महेशठक्कुरसंस्कृतग्रन्थमाला—पुष्पम् १

The Madras Sanskrit College Library
No. 10633
Mylapore, Chennai-600 004

प्रभाकरैकदेशीयमहामहोपाध्याय-
चन्द्रविरचितः

न्यायरत्नाकरः

(एकादशाध्यायः)

सम्पादकः

महामहोपाध्यायः

श्रीउमेशमिश्रः, एम० ए०, डी० लिट्०

दरभङ्गा

Scanned with OKEN Scanner

प्रथमसंस्करणम्
शकाब्दम् १८८४, खीस्ताब्दम् १९६३

मूल्यम्
सप्त रूप्यकाणि

प्रकाशकः—कामेश्वरसिंह-संस्कृतविश्वविद्यालयः, लक्ष्मीश्वरविलास-प्रासादः, दरभङ्गा ।
मुद्रक :—श्रीअमलकुमारवसुः इंडियन प्रेस (प्राइवेट) लिमिटेड, वाराणसी ब्रांच, वाराणसी ।

महेशठक्कुरसंस्कृतग्रन्थमाला—पुष्पम् १

Scanned with OKEN Scanner

EDITORIAL

One of the main objects of a university is to carry on higher researches and publish them and also to publish rare and old important Sanskrit texts. India is very reach in old manuscripts. Thousands of manuscripts are scattered all over the country wherein the great and most valuable treasures of the country are hidden. From a pretty long time efforts have been made to publish rare and old important manuscripts and bring into light the contributions of the old scholars of India to learning, in order to enable scholars to write the literary history of the country.

Among these collections of manuscripts sometimes we come across a single manuscript or even only a fragment of a rare manuscript, of which no second copy or even a complete manuscript is likely to be found out in near future.

There was a convention in the past amongst the orientalists to publish only such manuscripts, at least whose five copies are available. I remember when I was editing the *Mīmāṃsā-śāstrasarvasva* of Halạyudha, the late Mm. Dr Sir Ganganatha Jha, who was one of the scholars to establish the convention of publishing manuscripts when five copies of it were available, revised his decision in consultaion with other orientalists to publish a rare work of an important author even when a single manuscript was available. The reason seems to be that if even that single manu‹cript is lost in search of its other copies, the country will be poorer and that rare treasure will be lost to other scholars. Accordingly, I had to edit the *Mīmāṃsā-śāstrasarvasva* which is incomplete till now, on the basis of a single manuscript which was full of mistakes and *lacuna*.

The same principle I have applied to in publishing on the basis of a single rare manuscript of almost a lost work of Mm. Candra. This manuscript was found from the Darbar library of Nepal. It was in a bundle where I found a similar manuscript of Murāri Miśra's works on Mīmāṃsā. All these works are incomplete. I kept it in my possession for more than 30 years in order to find out another manuscript copy of it. But ultimately, I became disappointed in my effort and decided to publish it even based on this incomplete form.

Scanned with OKEN Scanner

The establishment of a University or a research Institute is justified dy its rare publications. With this idea in my mind, I have started to publish rare and old manuscripts in a Series for the benefit of the scholarly world. Mahamahopadhyaya Mahesha Ṭhakkur was the founder of the Dynasty of the present Maharajadhiraja of Mithila Dr Sir Kameshwara Singh Bahadur. He obtained this Raj in honour of his great scholarship and erudition. It is in the fitness of things that a series of Sanskrit publication of this university be started in order to commemorate the respectful memory of the great scholar, Mm. Mahesha Ṭhakkura, the author of the *Darpaṇa*, a commentary on the *Āloka* of Pakṣadhara Mishra and the scholar founder of the Darbhanga Raja. I may also add here that in fact, it was the desire of the late Mahārājādhirāja Dr. Sir Kameshwara Singh, Pro-chancellor of the Kameshwara Singh Sanskrit University to name the Series after the name of the founder of the present Dynasty, namely, Mahesha Ṭhakkura. So I have only fulfilled the wishes of the Mahārājādhirāja who had made every effort and sacrifice to establish this University at Darbhanga.

———

Scanned with OKEN Scanner

आमुखम्

प्राचीनसंस्कृतसाहित्यस्य प्रतिविभागं बहवो ग्रन्थाः सर्वथा लुप्ताः । केचन नाममात्रावशिष्टाः । अन्येषां सन्दर्भाः ग्रन्थान्तरेषु रक्षिताः । इतरे च मातृकापिहिताः । स्वल्प एव ग्रन्था मुद्रिताः सम्प्रदायसंलग्नाश्च विराजन्ते ।

पूर्वमीमांसाशास्त्रे नास्य व्यतिक्रमः । धर्मप्राणेषु भारतीयजनेषु धर्ममीमांसायाः प्रयोजनं न तिरोहितम् । आसंश्च तत्र विभागे केचन ग्रन्थाः जैमिनीयसूत्रव्याख्यानभूताः अन्ये पुनः प्रकरणात्मकाः । कालक्रमेण भारते युक्तिशास्त्रस्य प्राबल्ये सञ्जाते कर्ममीमांसादरे ह्रासो जातः ।

इदं तावन्मीमांसाशास्त्रं भाट्टप्राभाकरमिश्रभेदेन सम्प्रदायत्रयावगाहिनी दृश्यते । एतेषां प्रादुर्भावः सर्वेषु विद्याकेन्द्रेषु बभूव यद्यपि मिथिलैवास्य शास्त्रस्य जन्मभूमिः । अत एव मिथिलामण्डले अस्य विशेषप्रचारो दृश्यते स्म । राज्ञ्या विश्वासदेव्या राजत्वकाले एकदा एकस्मिन् पुष्करिणीयागे मीमांसकानां चतुर्दशशती समवेता बभूवेति श्रूयते ।

प्राभाकरप्रस्थानस्य स्वाधीनयुक्तिबहुलतया भाट्टप्रस्थानादधिकासीत् लोकप्रियतेति संभाव्यते ।

काले गच्छति न्यायादिदर्शनक्रोडीकृतस्य प्रबलतरसत्तर्कप्रवर्त्तितज्ञानवादस्याधिकमनोहारित्वात् सर्वत्र तस्यैवादरो बभूव ।

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।

ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयतामिति उदयनाचार्यानुभवानुसारेण क्रमशो यागादिविधानेषु आलस्यवशादनादरे सञ्जाते न्यग्बभूव मीमांसाशास्त्रविचारः पठनपाठनादिष्वपि ।

नेपालराज्याश्रितेष्वपि सतरीमहत्तरीमोरङ्गादिषु बहुषु ग्रामेषु मैथिलानां वसतिः बहोः कालाद्विद्यते । तस्मिन्नेव प्रान्ते कश्चित् पोषालीनामा ग्रामः आसीदिति सम्भाव्यते । तमेव ग्रामं प्राभाकरसम्प्रदायावलम्बी महोपाध्यायगुणरतेः पुत्रो महामहोपाध्यायश्चन्द्रः मिथिलामहीमण्डले स्वजन्मनालञ्चकार । मैथिलग्रन्थकारेषु चण्डेश्वरादिग्रन्थेषु बहुशो गुरुमताचार्यत्वेन तस्योल्लेखात् तत्प्रभावोऽनुमीयते ।

कालस्त्वस्याचार्यस्य न पूर्णतया निर्देष्टुं शक्यते । मुरारिमिश्रेण वरदराजेन चण्डेश्वरेण शङ्करमिश्रेण जयरामभट्टाचार्येण च तन्मतान्युद्धृतानि । एतेषु मुरारिः खीस्ताब्दीयद्वादशशतकात्

पूर्वग इत्यस्माभिरन्यत्र प्रतिपादितम् । वरदराजोऽपि प्राचीनः । वरदेश्वरश्च १३२४ खीस्ताब्दे विद्यमान आसीत् । प्रस्तुतग्रन्थस्य मूलभूता मातृका २५४ लक्ष्मणसंवत्सरे (१३७७खी:) विलिखिता । एभिः प्रमाणैः तत्कालस्यावरसीमा द्वादशशतकमिति निश्चयमर्हति ।

उपलब्धायां मातृकायां विवरणापरनामिकाया बृहत्याः श्रीकरस्य विवेकस्य भाष्यस्य पञ्जिकायाश्च समुल्लेखो दृश्यते । श्रीकरस्तु एकादशशतके विज्ञानेश्वरकृतायां मिताक्षरायां याज्ञवल्क्यस्मृतिटीकायां धृतः ।

विवेकः पुनर्भवनाथकृतो नयविवेक एवेति मन्ये । असौ द्वादशशतकीयो भवेत् इति बहवः । मुरारिश्च द्वादशशतकीय इममेव विवेकमामृशतीति कृत्वा भवनाथस्य कालः प्राचीनतरः स्वीकरणीयः । पञ्जिका पञ्चिका वा मैथिलशालिकनाथकृता ऋजुविमलाख्यबृहतीटीकेति निश्चप्रचम् । एतानि प्रमाणान्यामृश्य चन्द्राचार्यकालस्योत्तरसीमा ११०० खीष्टाब्दात् पूर्वमिति अस्माभिः स्थिरीक्रियते ।

आचार्योऽसौ प्रभाकरसम्प्रदायेऽपि स्वतन्त्रमतपोषक आसीदिति तद्ग्रन्थविवेचनातो ज्ञायते । तस्य कृतिषु प्रस्तुतजैमिनीयसूत्रटीका खण्डिताकारैव समुपलभ्यते । अत्र एकादशेऽध्याये पूर्वाध्यायानां समुल्लेखदर्शनात् मुरारिमिश्रेण चैतदीयप्रथमाध्यायामर्शनात्, कृत्स्नमेव जैमिनीय-दर्शनमनेन व्याख्यातमिति निर्णेतुं शक्यते । नयरत्नाकरो वा न्यायरत्नाकरो वैतस्य नामधेयम् ।

अत्र अन्ये अपरे केचिदित्यादिना अनामग्राहं केचन आचार्याः समुद्दिष्टाः । तेषां कालः प्रभाकरादनन्तरमेव भवेत् । एभिः समुद्देशैः प्रभाकरमतस्य ख्यातिबाहुल्यमनुमीयते । स्मृतिग्रन्थादपि कस्माच्चिदेकः श्लोकोऽत्रोद्धृतः । टीकैषा अधिकरणप्रक्रमेण निबद्धा स्वयं सम्पूर्णा च । प्राचीनव्याख्यानानि प्रायः प्रतिसूत्रं खण्डयित्वा स्वव्याख्यानं ददात्याचार्यः । सूत्राणां च पाठविधौ प्राचीनेभ्यो दर्शयति मतभेदम् ।

नात्राचार्यस्य दार्शनिकं मतं किमपि लभ्यते । शङ्करमिश्रेण जयरामेण च द्रव्य-गुण-कर्म-सामान्य-संख्या-समवाय-सादृश्य-शक्ति-क्रम-उपकार-संस्काराः चन्द्रस्वीकृतपदार्थत्वेनो-ल्लिखिताः । इति शम् ।

—

Scanned with OKEN Scanner

THE MADRAS SANSKRIT COLLEGE
MYLAPORE, MADRAS-600004

सम्पादकीयम्

विश्वविद्यालयस्य अन्यस्याप्युन्नतमविद्यासंस्थानस्य महत्त्वपूर्णं कार्यं विद्यते योग्य-विद्वद्भिः छात्रैश्च संस्कृतभाषानिबद्धेषु गूढतमविषयेषु अन्वेषणकार्यसम्पादनं तथा प्राचीन-लुप्तप्रायग्रन्थानां प्रकाशनम्। एतत्कार्यं विश्वविद्यालयेषु तत्समानसंस्थान्तरेषु च एव भवितुमर्हतीति नान्यत्र।

विदितमेव सर्वेषां विदुषां यद्भारतवर्षस्य आध्यात्मिकशास्त्रीयरहस्यपूर्णरत्नानि अद्यु-नापि प्राचीनहस्तलिखितपुस्तकेषु निगूढानि सन्ति। एतेषां हस्तलिखितग्रन्थानाम् अमूल्य-रत्नानां विनाशः प्रतिदिनं कालोत्पातकीटादिभिः दृश्यते। बहूनि तु विनष्टानि। मोहवशात् बहवो विद्वांसोऽपि एतेषां प्राचीनग्रन्थानां संरक्षणोपायं नैव जानन्ति, न च स्वयमेव रक्षां कर्तुं शक्नुवन्ति। राष्ट्रस्यामूल्यं रत्नं प्रत्नहस्तलिखितग्रन्था एव सन्ति। राष्ट्रनियमानु-सारम् एतेषां संरक्षणं समुचितम्। यदि अधुनापि एतेषां संरक्षणे वयं न सन्नद्धाः भवेम, तदानीं कः अन्यः एतेषां समुद्धरणे समर्थो भविष्यतीति।

अत एवास्माद्विश्वविद्यालयादपि ग्रन्थमालारूपेण प्राचीनतमामूल्यग्रन्थानां प्रकाशनं नितरामपेक्षितं वर्तते। एतत्सर्वं विचार्य्य वयमपि कर्तव्यस्यास्य पालने तत्पराः सञ्जाताः। तत्सम्पादनायाद्यारम्भः क्रियते।

मिथिलाधीशानां दिवङ्गतमहाराजाधिराजडा०सरकामेश्वरसिंहबहादुरमहोदयानां पूर्वजाः दर्पणादिग्रन्थनिर्मातारो दरभङ्गाराज्योपार्जकाः पण्डितप्रवराः महामहोपाध्याय-महेशठक्कुराः आसन् इति सर्वेषां विदितमेव। दरभङ्गाराज्येन या संस्कृतविद्यायाः विदुषां च दानादिपारितोषिकप्रदानत्यागैः सेवा कृता संस्कृतभाषायाः संरक्षणे तत्परता च समये समये प्रदर्शिता, सा तु अधुना अन्यत्र दुर्लभैवेति कस्य अविदितमस्ति। इति मत्वा दिवङ्गतानां तेषां स्मारकरूपेण 'कृते च प्रतिकर्त्तव्यमेष धर्मः सनातनः' इति चिरन्तनोक्तिमनुस्मृत्य च अस्याः संस्कृतग्रन्थमालायाः 'महेशठक्कुरग्रन्थमाला' इति 'संज्ञाकर्म' तु अस्माभिः कृतम्। अनेन तु दिवङ्गतानां महामहोपाध्यायानां महेशठक्कुराणाम् आत्माऽपि तृप्तो भविष्यति विदुषां च लाभः शास्त्राणां च संरक्षणमपि भविष्यतीति। अथ च दानेन त्यागेन महता प्रयत्नेन च संस्कृतविश्वविद्यालयस्यास्य संस्थापकानां दुर्दैववशादसमये एव दिवङ्गतानां महाराजाधिराजानां कामेश्वरसिंहशर्म्मणां विश्वविद्यालयस्यास्य प्रति-कुलपतीनां (Pro-chancellor) च आशापि तथैवासीदित्यस्माभिस्तेषामिच्छानुकूलमेव कार्यं सम्पादितमनेन तेषामपि आत्मा संतुष्टो भविष्यतीति शम्।

Scanned with OKEN Scanner

INTRODUCTORY

It is a fact that even now a vast literature of Indian thought is lying in the dark unknown to the literary world. Except certain references either by contemporary, or by later writers, we do not know much of several works and of scholars of great name and fame. Efforts in the field of research lead us to unearth every day some fresh material, fragmentary though it may be, of almost forgotten schools of Indian thought. This is not merely true of the several schools of philosophy but of all the branches of learning some of which are practically lost to us. Of the several reasons why Indian literature suffered so much, a few are advanced here with reference to the school of Pūrva-Mīmāṁsā with an aspect of which the present publication is concerned.

India being essentially a country of *Spiritual Religion*, it is but necessary that a system of thought should deal with the nature of *Dharma* (duty) in all its bearings. Here in India, every school of philosophy aims at Mukti, the highest value of life either by getting rid of pain, or by the attainment of *Tattvajñāna*. Whatever may be the means of it, it is a fact that it can be realised through the *Law of Karman*. Hence, a system dealing with Dharma in all its aspects which includes the *Law of Karman* must have preeminently occupied the attention of the people. Over and above these, we know that the Buddhists had severely attacked the performances of Vedic rites and rituals and there was every danger of losing the influence of Vedic culture for ever. It was therefore, necessary that a revival should take place and the importance of the Vedic rituals and rites should be preached against Buddhism. This was perhaps the reason why Pūrva-Mīmāṁsā was once so widely read and practised and several scholars with their individual difference wrote on it.

There were three main schools of Pūrva-Mīmāṁsā, namely, the *Bhaṭṭa school*, the *Prabhākara school* and the *Murāri Mishra School*. To study Mīmāṁsā was considered an essential part of study even very lately. This must have given fresh impetus to every centre of learning. But it appears that in Mithilā its study reached its zenith. The reason seems to be that Mithilā was on the very border of Magadh where the Buddha and Buddhism had flourished and due to which most probably, the Mithilā scholars had to write on Pūrva Mīmāṁsā in defence of the Varṇāśrama Dharma against the Buddhist attack. We find that during the reign of Rānī Viśvāsa Devī, wife of Rājā Padma Sinha, brother of Rājā Śiva Sinha, the patron of Vidyāpati Ṭhakkura.

Scanned with OKEN Scanner

there was a gathering of Paṇḍitas in Mithilā in which some fourteen hundred Mīmāṁsakas alone were invited.[1]

Of these schools of Pūrva Mīmāṁsā thought, the school of Prabhākara Miśra became more and more popular.[2] It attracted the attention of scholars from different parts of the country. There was hardly a scholar of Pūrva-Mīmāṁsā who did not study and write on this school of thought. But several of these scholars preserved their own individuality and created several subdivisions under this school. The reason why this school became so popular seems to be that, unlike the Bhaṭṭa or the Mishra school, it had more scope for independent thinking and reasoning.

But as time went on, things changed. Perhaps due to the fresh impetus given to Navya-Nyāya, Vaiśeṣika, Vedānta and several Vaiṣṇava schools, the school of Pūrva-Mīmāṁsā suffered much in later centuries of the Christian Era. The system of Pūrva-Mīmāmsa, in fact, is not a philosophical system.

It mainly deals with the consideration of the practices of Vedic rites and rituals, the regular performance of which requires a regular life full of patient activities and physical and mental discipline. There is no freedom of thought and activity under this system. As a matter of fact, there is a regular discipline to be rigidly followed when any theory has to be practically explained. Hence, this sort of restriction would have been felt very much and consequently, it could not continue for a long period. The zeal for the study and performance of Vedic rites and rituals gradually gave way and scholars took pleasure in concentrating their attention on the subtleties of Neo-Nyāya and Vedānta. Again, perhaps it might also be due to the fact that people did not like to work under the yoke of Authority which Pūrva-Mīmāṁsā preached. They did not like to see reason sacrificed. Further, the rapid growth and developmet of Navya-Nyāya must have been one of the main causes in the neglect of studies and practices of Pūrva-Mīmāṁsā. Hence, the change was inevitable. The age of Reason

---

1. *Puruṣaparīkṣā* along with the Maithilī translation, (Darbhanga edition), p. 262, Ft. Note.

2. The following verse current in Southern India also speaks of its popularity :—

गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना
क्षीणा काणादवाणी द्रुहिणहरगिरः सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिर्जगति गुरुमतं गौरवाद्दूरवान्तं
का शङ्का शङ्करादेर्भजति यतिपतौ भद्रवेदीं त्रिवेदीम् ॥

—Dr Ganganatha Jhā's *Prabhākara-Mīmāṁsā*, p. 10.

prevailed. This should not be taken to mean that Authority was disregarded altogether. It occupied only a place of secondary importance later on. Due to these and several other similar reasons the regular practice of the Vedic rites and rituals and consequently, the study of Pūrva Mīmāṁsā became neglected.

Under such circumstances there flourished one of the well-known Mīmāṁsakas of the Prabhākara school, Mahāmahopādhyāya Candra. He was the son of Mahopādhyāya Guṇarati who was wellknown in the society of the learned. He belonged to the family of Pośālī (?) in Mithilā.[3] No more about his family history is known to us. That he was held in great respect by Mithila scholars is clear from the fact that Caṇḍecvara Ṭhakkura, the great Maithila Nibandhakāra, speaks of him as *Gurumatācārya*.[4]

Nothing can be definitely said about the exact time of this author. But references to him by contemporary and later writers are not wanting. Thus, Murāri Misra II[5] refers to his views and refutes them.[6] Varadarāja, son of Raṅganātha, grandson of Devarāja, great-grandson of Praṇatārtihara and pupil of Sudarasna,[7] while commenting upon *Nayaviveka* of Bhavanātha

---

३ गरीयोभिर्विद्वत्परिषदि सदोद्गीतमहिमा
महोपाध्यायः श्रीमान् गुणरतिरभूद्यस्य जनकः ।
असौ चन्द्रः श्रीमानकृत नयरत्नाकरमिमं
निबन्धं पोशालीकुलकमलकेदारमिहिरः ॥

...the end of the colophon of the 11th Adhyāya of the *Nyāyaratnākara*.

It must be pointed out that there are about seven districts of Nepal which come within the district of Darbhanga even to-day and in these districts Maithilas had settled from a very long time. There are Maithilas even today in those Districts. Then again, there is no tradition of Mīmāṁsā amongst the non-Maithilas of Nepal. Further, Prabhākara Mishra and his School flourished in Mithilā and so, I think that the term *Pośālī* must be familiar to Mithilā and Scholars living there must have been Maithilas.

४ आषाढादिचतुर्मासमित्यत्र कार्त्तिक्यां समापनमित्यादौ शुक्लादिमासपरिग्रहोदाहरणन्तु कार्त्तिकादितृतीयायामिति नभस्यमासस्य तमिस्रपक्षे त्रयोदशीत्यादि । अयं चार्थो गुरुमताचार्यचन्द्रादीनामप्यनुमतः ।

...*Kṛtyaratnākara*, p. 82. Bibl. Edition.

5. Vide Umesha Mishra—*Murārestṛtīyaḥ panthāḥ*. Proceedings, Oriental Conference, Lahore, pp. 967 ff.

6. *Tripādinītinayanam*, Ms. Fol. 22-24.

7. *Catalogus Catalogorum* by Th. Aufrecht.

Scanned with OKEN Scanner

Miśra, refers to Candra.[8] Caṇḍeśvara Ṭhakkura refers to him in supporting his own statement.[9] Śaṅkara Miśra, the well-known author of the *Upaskāra* refers to his view in his *Vādivinoda*.[10] And lastly, Jayarāma Bhaṭṭācārya also refers to his views in his *Nyāya-Siddhānta-Mālā*.[11]

Besides, Vāsudeva Sārvabhauma has mentioned his view in his *Śabdamaṇiparīkṣā*, the view thus refered to is found in the *Tattvacintāmaṇi*, of Gaṅgeśa in the Śabdakhaṇḍa. Rucidatta Upādhyāya also refers to him in his *Śabdamaṇiprakāśa*.

I have already pointed out elsewhere that Murāri II cannot be later than the 12th century A. D. Varadarāja is also an old writer. Caṇḍeśvara lived in about 1324 A. D.[12] Besides, the Ms. of which a transcript is with me and upon which the present edition is based is itself dated 258 La. Saṁ.,[13] which comes to 1377 A. D. This date shows that 12th century is the *terminus ad quem* of Candra's date.

Again, when we study this fragmentary work of his available to us, we find that Candra refers to the *Vivaraṇa*, *Śrīkara*, the *Viveka*, and the *Pañcikā*. He also refers to the *Bhāṣya* and Guru. Of these, the *Vivaraṇa* is considered to be another name of the *Bṛhatī*, the work of Prabhākara himself.[14] About Śrīkara we know that his earliest reference is found in the *Mitākṣarā* on the *Yājñavalkya Smṛti* of the 11th century and also in the *Tattvacintāmaṇi* of Gaṅgeśa. Hence, he must have lived either in the latter half of the 10th century, or in the beginning of the 11th century, if Vijñāneśvara be placed in the later half of the 11th century. The *Viveka* is believed to be the same as the *Nayaviveka* of Bhavanātha Miśra, who is considered to have lived in about 1200 A. D., or in the beginning of 1400 A.D.[15] But this date will have to be pushed back at least by one century, or even more, in the light of our researches that Murāri II, who must have lived in the 12th

8. *P. W. S. Studies*, Vol. VI, P. 169.

9. *Supra* p. 3, ft. note 2.

10. P. 53.

11. *P. W. S. Text*, No. 21, Pt. 2.

12. Umesha Mishra-*Caṇḍeśvara Ṭhakkura and Maithilī*. A. U. Studies, Vol. VI, Pt. I.

13. ल० सं० २५८ कन्हौ ग्रामे महोपाध्यायश्रीरत्नाकरात्मजेन पठता श्रीहरिकरेण लिखितमिदं पुस्तकम् ।

14. Vide *Proceedings of the Third Oriental Conference* pp. 477-478.

15, Vide the *Princess of Wales Saraswatibhavan Studies*, Vol. VI, p. 169.

Scanned with OKEN Scanner

century A. D., has referred to this very *Viveka* in his *Tripādīnītinayanam.* Again, we know that this very Candra who has been referred to by Murāri Miśra II, quotes the views of the *Viveka* very often. Hence, either we shall have to believe that the *Viveka*, referred to by Murāri Miśra II and Candra, is altogether a different work written before the 11th century, or the date of the author of the *Viveka*, namely, Bhavanātha Miśra, will have to be pushed back by two centuries at least. These facts disprove the view that both the author of the *Viveka* and the father of Śaṅkara Miśra, the author of the *Vaiśeṣika-Upaskāra* are the same person. Lastly, we come to the *Pañcikā* also spelt as *Pañjikā.* It is another name of the *Ṛjuvimalā*, a commentary on the Bṛhatī of Prabhākara Miśra by Śālikanātha Miśra who, most probably, belonged to the middle of the 10th century. Now considering all these facts, we may say that the 11th century is the *terminus a quo* for the date of Candra. We might, therefore, place him at present before 1100 A. D.

About his literary activities we know that he was a Mīmāṁsaka of the Prabhākara school and held an independent view of his own. The works of his, so for known to us, is a commentary on the *Jaiminīya Sūtras* in the Adhikarana form published now and the *Amṛtgbindu.*[16] It deals with the sections on the *Vidhi* and the *Apūrva.* There are references in this work to the *Nibandha*, the *Vivaraṇa.* and the *Prakaraṇapañcikā.* The *Amṛta-bindu* has been cited in the *Śabdālokodyota*[17] of Vāhinīpati. Most likely, Candra wrote a complete commentary on the *Jaiminīyasūtra* of which only a portion is found as yet. He himself in his commentary on Adhyāya XI seems to have made references to his commentary on the previous Adhyāyas. Murāri Miśra II refers to his (Candra's) views on the first Adhyāya of the *Jaiminīya-Sūtras.* No more proof is available at present.

This commentary is named *Nyāyaratnākara* or *Nayaratnākara.* This is perhaps the second commentary on a work of Pūrva-Mīmāṁsā which is so named, the other being the *Nyāyaratnākara* of Pārthasārathi Miśra on the *Ślokavārtika.* There are two more works, so far known, named *Nyāyaratnā-kara*--a work by Kṣemānanda Dīkṣita on Yoga and the other by Vanamālī Miśra on the Mādhva School.[18]

16, This manuscript seems to me to be a part his work on the *Jaiminīyasūtra.* It has different names for its separate sections like those of the *Prakaraṇapañcikā.*

17. Vide *History of Navya-Nyāya in Mithila* by Prof. Dinesh Chandra Bhattacharya, pp. 66-67.

18. Vide *Cat. Catalogorum* by Th. Aufrecht, Vol. I, p. 309 Vol. III, p. 66.

In this portion of the commentary Candra refers to Śrīkara, the *Viveka* the *Vivaraṇa*, Guru, the *Bhāṣya*, the Bhāṣyakāra, the *Pañcikā* and several others as *anye*, *apare*, *kecit*, etc. These latter references show that after Prabhākara and before Candra there were several other independent writers on Pūrva-Mīmāṁsā of whom we have no knowledge as yet. It also proves that this school of thought was very popular amongst the scholars of those days. He also quotes a line from some Smṛti.[19] The commentary is written Adhikaraṇa-wise but is very lucid and complete in itself. In almost every case, the author refers to the views of others before giving his own. He sometimes differs from the old readings of some of the Sūtras and also in dividing the Adhikaraṇas after a particular Sūtra.[20]

In this fragmentary work of his we do not get any information as to his philosophical views. So all our knowledge regarding this point is from other sources. Thus, Śaṅkara Miśra[21] and Jayarāma Nyāyapañcānana[22] tell us that Candra holds that there are eleven Padārthas (Categories), namely, dravya (substance), guṇa (attribute), Karman (action), Sāmānya (generality), saṅkhyā (number), samavāya (inherence), sādṛśya (resemblance), śakti (capacity) in common with others of the Prabhākara school, while krama (succession), upakāra (auxiliary) and saṁskāra (impression) as his own additions to the above mentioned eight categories.

The late Mahāmahopādhyāya Hara Prasad Shastri has written the following note about this manuscript in his catalogue of Sanskrit Manuscripts—

The manuscript is copied from the following source. Catalogue of Palm-leaf manuscripts in the Darbar Library, Nepal. pp. 30 and 113 No. 1076 (ka) which is however, to be differentiated from the work of the same name in the *Cat. Cato*, Vol. I, p. 310 A and also from that mentioned in the *Cat. Cato.* Vol. III. p. 66 A. It was copied in 264 la saṁ.

He further adds, about Pośālī grāma, "It is a village giving its name to a clan of Brāhmaṇas, both in Mithila and in Bengal".

Manuscript notes—10 × 1 inches, Folio 52, lines 6 on a page. Extent 1,148 ślokas, character Maithili. Date Lakṣmaṇasen Era 264. Appearance—old, Prose. Generally Correct.

---

18. अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः ।
शेषा मासास्त्रिभा ज्ञेयाः कार्त्तिकादिव्यवस्थयेति स्मृतेः—
—*Nyāyaratnākara* on II. 2. 52, MS. Fol. 55.
20. Vide *Jaiminīya Sūtras* II. I. 38, 68.
21. *Vādivinoda*, p. 53.
22. *Nyāyasiddhāntamālā*, *P. W. S. Text*, No. 21, Pt. 2,

ओं नमो नारायणाय

अथ न्यायरत्नाकरः

एकादशाध्यायः

प्रयोजनाभिसम्बन्धात् पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् ॥११।१।१

अत्रावान्तरकार्यतन्त्रतैवध्यायार्थ इति **श्रीकरः**। तथा हि—कार्यार्थमनुष्ठानम्। अतः कार्यतन्त्रत्वादेव तत्तन्त्रता नान्यथा। तथाकरणस्य प्रयाजादेर्देशादेश्चाभेदात्कार्यस्याज्ञापूर्वस्य तन्त्रत्वं सुज्ञानम्। तथा कार्यत एवोत्तरषट्के चिन्तेति न कार्यमनपेक्ष्यानुष्ठानतन्त्रता (याः ?)। अतः सा कार्यतन्त्रतायाः फलम्। एवञ्च यदा प्रथमानुष्ठानादेव कार्यं सर्वार्थं जातमिति ज्ञानं तदा कार्याभावात्पुनरनुष्ठानबाधितस्यार्थस्यानुष्ठानस्य तन्त्रता सिद्ध्यतीति कार्यतन्त्रता फलेऽनुष्ठानतन्त्रत्वे हेतुर्ब्रुवन् वा यः कार्यतन्त्रत्वे हेतुर्याग इव फलभावनादिति।

यच्च विविक्तं कार्यस्यातीन्द्रियत्वात्तन्त्रत्वं नानुष्ठानतन्त्रतां विना अज्ञानमतो देशादितन्त्रत्वादनुष्ठानतन्त्रता, ततः कार्यतन्त्रतेति प्राथम्यादनुष्ठानतन्त्रतैवाध्यायार्थः। तदपि निरस्तम्। कार्यभेदाभेदसन्देहस्यानुष्ठानतन्त्रताविरोधिनः सत्त्वेऽनुष्ठानतन्त्रताद्येपायोगात्।

अन्ये त्वाहुः—यद्यपि विनियोगतोऽनेककरणसाधारण्यं प्रयाजादेर्ज्ञानं तथापि किमेकैव व्यक्तिः सर्वार्था उतानेकेति विनियोगतोऽनपनीतमपि सन्देहविशेषनिष्ठतयानुष्ठानमेकं लाघवादाक्षेप्तुं प्रवृत्तः प्रयोगविधिरेव विशेषविनियोगमुपसंहृत्यापनयति। अन्यथा विशेषानुष्ठानायोगात् स हि लाघवादनुष्ठानमेकमेव सर्वार्थतयाद्विपति। उद्देशविशेषाग्रहो देशकालकर्तृभेदश्च तद्विरोधी। तन्निवारणे चोद्देशविशेषाग्रहो देशाद्यभेदश्च व्याप्रियते। एवञ्चानुष्ठानतन्त्रत्वार्थमेव प्रयाजादितन्त्रत्वस्य प्रयोगविधिना ज्ञापितत्वादनुष्ठानतन्त्रतैवाध्यायार्थः।

यद्वा प्रयाजादितन्त्रतैव। यत इह प्रयाजादितन्त्रतैवाध्यायार्थः। **यत्सकृत् कृतमिति च प्रयोगस्तन्त्रमिष्यत इति च प्रयोज्यः प्रयोगी भवतीति न्यायादुक्तं** कार्यन्तु प्रतिकरणं साधारणमसाधारणम्वेति सन्देहोऽनुष्ठानतन्त्रत्वाय प्रयोगविधिनाऽपनीयते। असाधार-

Scanned with OKEN Scanner

एयेऽपि च बहूनां कार्याणामेकव्यक्तिसाध्यत्वसम्भवेऽनुष्ठानतन्त्रत्वाविरोधात् । यत एव न कार्यतन्त्रतानुष्ठानतन्त्रत्वे हेतुरत एवैन्द्रदधिपयसोस्तन्त्राद्गतावपि कार्यभेदः । किन्त्वनुष्ठानतन्त्रत्वे सति लाघवात् कार्यमेकमस्तु । इयमेव कार्यतन्त्रता यदेकस्मादेवानुष्ठानादेकदानेककार्यसिद्धिरिति ।

इदन्त्वुच्यते—उक्ते बाधितेतरानुष्ठाने तदनुष्ठानधर्मः सकृत्त्वमेव चिन्त्यम् । अन्तरङ्गत्वात् प्रयोजनत्वाच्च साङ्गं प्रधानानुष्ठानावस्थकृतिसाध्यतया पूर्वाभिधानात् । अनुष्ठानविशेषज्ञापनार्थत्वाच्चाङ्गानामनुष्ठानमेव प्रयोजनमतस्तस्यैव सकृत्त्वासकृत्त्वाभ्यां चिन्ता तथा देशकालकर्तारः प्रयोगाङ्गम् । शास्त्रार्थतया देशादेः प्रयो × × × दन्वयः । पदार्थभेदे प्रतिपदार्थमावर्ततामगत्याऽनेककरणार्थप्रयाजाद्यभेदे तु न देशाद्यावृत्तिर्याय्येत्यनावृत्तदेशाद्यन्वयबलादनुष्ठानतन्त्रतैव साक्षात् सिद्ध्यति कारणविशेषात् । देशादयो हि साक्षादनुष्ठान एव कारणम् । ततः प्रयाजादिस्ततस्तदवान्तरकार्याद्उपकारः तथा देशादेः प्रयोगार्थवत्त्वमित्यर्थवत्त्वभूतदेशादिशास्त्रभेदादर्थवध्यमानस्य प्रयोगस्यापि शास्त्रार्थतया अभेद इति न पदार्थकार्यतन्त्रयोः फलभूतयोरध्यायार्थता ।

एवञ्च प्रयोगविधेरभेदात् प्रयोगस्यैक्ये देशादेस्तन्त्रत्वम् । तद्बलादनुष्ठानतन्त्रता । अन्यथा प्रतीतदेशादितन्त्रताव्याघातापत्तेः । तद्बलादेवालौकिकस्य कार्यस्य तन्त्रतानिश्चेतुं शक्या नान्यथेति न पदार्थकार्ययोस्तन्त्रताध्यायार्थः । कार्यभेददर्शनन्तु तद्विरोधि । तच्च सन्निपातिष्विव इह नास्ति । इत्थमेव कार्यं विमृश्यमाणं तन्त्रताज्ञानं जनयतीति कार्यत एवेयश्चिन्ता । देशादितन्त्रतोन्नीतानुष्ठानतन्त्रतयोन्नीतमेव कार्यतन्त्रत्वम् अनुष्ठानतन्त्रत्वनिश्चायकम् । ततः कार्यतन्त्रत्वनिश्चयः अनुबध्यमाननियोगभेदादिवोन्नीतादर्थवत्त्वभेदाच्छास्त्रभेदनिश्चयः इति कार्यजत्वम् । एतेन कार्यसाधारण्यादनुष्ठानसाधारण्यमनुष्ठानसाधारण्यात् कार्यसाधारण्यमित्यन्योन्याश्रयमपि निरस्तम् । एवमध्यायार्थेऽनुष्ठानतन्त्रत्वे बाधस्य हेतुत्वसम्भवात् फलांशे हेतुतया हेतुत्वमित्यपि निरस्तम् । तथा प्रयोज्यसाधारण्यं विनियोगादेव ज्ञातम् । व्यक्तितस्तु तद्भेदाभेदावनुष्ठानतन्त्रत्वात्तन्त्रत्वाधीनाविति न पदार्थकार्यतन्त्रयोरध्यायार्थता उपकारतन्त्रतानुकरणभेदादप्यसम्भविनी अवान्तरकार्यश्चैकमेवानेकार्थसामर्थ्यभेदात् । एकस्माच्च समवाय्यसमवायिकारणादेकदाऽनेककार्योदयकल्पनाऽयोगात् । प्रयोगविधिस्तु विनियोगमुपसंहरतीति वाङ्मात्रम् । अतोऽनुष्ठानतन्त्रतैवात्र चिन्त्या । सैव कार्यतन्त्रता वा प्रसङ्गहेतुः । अत एव प्रयोगस्तन्त्रमिष्यत इत्युक्तम् । आद्ये फलतन्त्रता न साक्षात् सङ्गता अवान्तरकार्यजत्वाभावाद्बाधाहेतुकत्वाच्च । किन्तु प्रयाजाद्यनुष्ठानतन्त्रतेति वक्तुं प्रयाजादितन्त्रताध्यायार्थ इत्युक्तं **पञ्जिकायाम्** । अत्र बाधो हेतुः स्थिते बाधितेतरानुष्ठाने तन्त्रत्वं तद्धर्मश्चिन्त्यते यतः ।

ननु विकृतौ सन्निपातविषयो बाधः। प्रकृतावारादुपकारिषु तन्त्रतेत्यपत्तधर्मता स्यात्। विनापि विकृतौ बाधपर्यन्ते न प्राप्तिसौष्ठ्य प्रकृतौ तन्त्रतासम्भवात्। चतुर्थे चानुष्ठानाक्षेपो दशमे त्वसौ क्वचित्पदार्थविशेषोपोद्यत इति चतुर्थानन्तरमेव तन्त्रताचिन्ता युक्ता।

अथोच्यते— प्रकृतावपि प्राप्तिसौ[ष्ठ्यं] × × विकृतौ बाधम्विना न सम्भवति। अन्यथा हि प्रकृतौ बाधितेतरैरुपकारसिद्धावज्ञापितायामुपकारपूरणप्रयाजादिदर्शनञ्च तत्र सुस्थं न स्यात्। तदर्थं पुनः सप्तमाद्यपूर्वपक्षापत्तेः प्रकृतावेव नारादुपकारकसौ[ष्ठ्यं] × × × न च सप्तमाद्यपूर्वपक्षेऽनेककरणको नियोगोस्ति येन सर्वकरणानुषङ्गानुष्ठानं सकृत् स्यात्। तथोपाधिपूर्वं धर्माणां तावतामनुष्ठानाशक्ते च प्रामाण्यमेव यावत् दूरे हेतुता। अतो बाधपर्यन्तेन प्रकृतिविकृत्योर्धर्मप्राप्तिसौ [ष्ठ्यं]— — ` सत्यनुष्ठानतत्प्रकारयोश्चिन्तेति बाधो हेतुः।

न चैवमनुष्ठानक्षेपोऽपि बाधान्तरमिति वाच्यम्, उपादानं हि तत्र तादर्थ्यादिविषयतयाध्यायार्थ इत्यनुष्ठानविषयतयापि तद्बोधितम्। तथा प्रयुक्तिनिर्वाहकतया तु न तच्छरीरे प्रविष्टतयाऽकार्यजत्वात्प्राथम्यात् क्रमोऽपि तदनन्तरं चिन्तित इति जिज्ञासावसरयोरभावाद्बाधानन्तरमेव चिन्ता। तथाऽनुष्ठानक्रमादुद्दिश्य विधानेऽपि स्त इति। यद्यपि सप्तमाद्यसिद्धान्तन्याय उक्तस्तथापि बाधेऽसति पुनरसौ शिथिलीभवति। न च तदा दर्वीहोमन्यायेन विविक्तादुपकाराकाङ्क्षाकल्पना नित्यानुवादवचनतया लिङ्गदर्शनसमाधिरिति वाच्यम्, यतस्तदा हि प्रयाजाद्यन्वितधर्माणां सौर्याद्यन्वयप्रतीतिः सर्वथा भज्येत। दर्शपूर्णमासवाक्यानान्तूद्देश्यपरत्वेऽधिकारिमात्रस्य कालमात्रस्योपलक्षणत्वेऽपि न कामिकालश्रुत्यहीनां तथावि...[— । च श्रूयमाणदेवताके दर्वीहोमन्यायोप्यस [सौ] ब्रवीति सप्तमाद्यपूर्वपक्ष एव। तन्न। सप्तमाद्यपूर्वपक्षेप्यारादुपकारकाङ्क्षेषु तदङ्गारादुपकारकाणां साधारण्येन चान्यविहितानां तन्त्रत्वसम्भवात् यथा प्रतिज्ञातप्रयाजादितन्त्रत्वं न स्यादिति चेत् एवं हि यथा प्रतिज्ञाताविशेषितप्रकृतिविकृतिसाधारणे तन्त्रताया बाधम्विनाऽसम्भवादेव बाधस्य हेतुतोच्यतां किं सप्तमाद्यपूर्वपक्षापत्तिवचनेन।

किञ्च सत्यपि बाधे सप्तमाद्यसिद्धान्तनयोस्तीति वरं प्रजापतिव्रतपूर्वपक्षनयात् क्रत्वर्थता विश्वजिदादेः तदा चापेक्षायां सन्निहितकर्मदेवतात्रयमेव यजिशब्दो बध्यतीत्यलं बहुना।

उच्यते— किं प्रतिकरणं विनियोगभेदाद्यथा विनियोगं भेदेनानुष्ठानं ततः सकृदिति चिन्ताबाधहेतुकं तथा हि यदा सत्यामपि प्राप्तौ कार्यार्थमनुष्ठानं कार्यसम्भवे तदसम्भवाद्भाव इत्युक्तं तदा प्रकृतावपि सकृदनुष्ठानेनैव कार्यसिद्धेः पुनरनुष्ठानात्कार्याभावात् तन्त्रता। तथा विनियोगभेदेऽपि सकृदनुष्ठानेन कार्यसिद्धिसम्भवादयोग्यत्वाभावे देशादितन्त्रत्वादनुष्ठानतन्त्रता

ज्ञातुं शक्या नान्यथेति प्रकृतौ बाधस्तन्त्रतायां हेतुः। कार्यजा चेयं चिन्तेति न चतुर्थानन्तरं सम्भविनीत्युक्तं सप्तम एव।

अन्ये त्वाहुः—प्राकृतवैकृतकर्मसंघातस्य पक्षत्वानुपपक्षधर्मता वैकृताङ्गानुष्ठानांशे बाधो व्याप्रियमाणः सन् पक्षगत एव पर्वतैकदेशगतधूमः तथाऽनुष्ठानाक्षेपः प्रकृतौ विकृतौ च युगपत्प्रवृत्तौ विकृतिस्थितलुप्तद्वारकादिदेशागतपदार्थमात्रबाधे दाशमिके सति प्राकृतवैकृते पदार्थव्यापिकैरपदार्थव्यवस्थितिरिति सर्वत्रैव तन्त्रबाधो हेतुः। तथा चतुर्थे सामान्येन साङ्गप्रधानानुष्ठानमाक्षिप्तं विशेषणलुप्तद्वारकपदार्थव्युदासेन याऽनुष्ठानावस्था दशमे सा पदार्थविशेषगतानुष्ठानतन्त्रत्वे हेतुः सम्भवतीति बाधानन्तरमेव तन्त्रता न चतुर्थानन्तरं तथोक्तसौत्रादानिकचिन्तायामस्त्वनुष्ठानान्तर्भावः। ततस्तन्निर्वाहकतया तच्छरीरनिविष्टतयाऽकार्यजत्वाच्च क्रमोप्यस्तु तौ चानुष्ठानक्रमौ विकृतावपि फलिष्यतः। न तु तदा तन्त्रता। क्रमस्तु न तन्त्रत्वे हेतुः। तम्विनापि तन्त्रत्वसम्भवात्। तथा प्रकृतिविकृतिसाधारणी तन्त्रचिन्ता सा सर्वत्रैव स्वस्थायामुचिता अगत्या ह्यनागतावेक्षणं प्रकृतौ कृतं विकृतौ फलितञ्चेति।

अपरे तु प्राप्तबाधवदप्राप्तबाधस्यापि (कार्याभिन्नत्वात्) प्रकृतावपि तन्त्रत्वे बाधो हेतुरित्याहुः। तच्चिन्त्यम्।

विवरणे तु कार्यप्रत्याम्नायो हि तन्त्रत्वस्य मूलं, यदा कार्याभावाद्भाव इति पूर्वत्रोक्तं तदाद्यानुष्ठानेनैव सर्वकार्यसिद्धेः कार्याभावात्पुनरनुष्ठानबाधे तन्त्रतेति बाधो हेतुः। यथा यत्र कार्यदर्शनं तथा तत्रानुष्ठानमिति बाधलक्षणसिद्धत्वात्।

नन्वेवं तेनैव गतत्वात् नेह व्युत्पाद्यं किञ्चित्स्यान्नैव स एव पुनरनुष्ठानबाधो नास्तीतिशङ्कां कर्त्राद्यभेदेनानुष्ठानाविशेषबोधनात्पुनरनुष्ठानकार्याभावद्वारा पूर्वोक्तशृङ्खलया निरस्यानुष्ठानतन्त्रतात्रैव साध्य इति व्युत्पाद्यानन्तरमस्तीति।

अत्र च **'यत्सकृत् कृतं बहूनामुपकरोति तत्तन्त्र'मिति भाष्यं** तदप्रयोज्यं प्रासङ्गिकञ्च व्याप्नोति। तथा य आवृत्योपकरोति स 'आवाप' इत्यपि चातुर्मास्याङ्गानां प्रयाजानां न च प्रयाजान् यजतीति विधिबलादावृत्योपका(रा)णामावापरूपता स्यादिति मत्वा **गुरुभ्योक्तं** तन्त्रं नामभेदेन प्राप्तौ सत्यपि सकृदनुष्ठाने नात्रसिद्धिः। **आवापस्तु** यथाप्राप्तिभेदेनानुष्ठानम्। अत्र च प्राप्तिपदेन विनियोगापादानेऽभिप्रेते यद्बहूनामङ्गं बहूनां कृते सकृत् कृतं बहूनामुपकरोति तत्तन्त्रम्। तथा हि—पुरोडाशकपालस्य तुषोपवापं प्रति यद्यपि भेदेन विनियोगोऽस्ति तथापि भेदेनोपादानं नास्ति। दध्यानयनादेस्तु वाजिनादौ विनियोगोऽपि नास्ति। प्रसङ्गे तु तन्त्रिण एव प्रयुक्तिः प्रथमभाविनीति न भेदेन प्राप्तिः।

Scanned with OKEN Scanner

ननु प्राप्तिपदमुपादानपरत्वेनैव क्रतोर्न व्याख्यातम्। मैवम्। तर्हि चातुर्मास्ये प्रयाजानां न बहुश्रुतौ भेदेनोपादाने तन्त्रता न स्यात्। अतो यथा यत्र विनियोगतो भेदस्तथा तुल्यकार्यत्वादिना प्रयुक्तिभेदे प्रसङ्गे सकृदनुष्ठानेनानुसिद्धिस्तन्त्रमित्युक्तं सिध्यत्यनेन सिद्धिपदेन प्रयाजादिरुक्तः। एवं व्याख्याने **भाष्या**विरोधः।

भाष्ये ह्युपकारकमेव साकारणं **तन्त्र**मित्युक्तं यत् सकृत् कृतमित्यभिधानात् न पुनरर्थसिद्धिर्भावसाधनाभेदेनानुष्ठीयते यः स **आवापः**। अनुष्ठीयत इत्यनुष्ठानम्। अत्रापि **भाष्य**विरोधादिति स चावापो न त्वावकार्यतः किन्तु विनियोगादिति नेह चिन्त्यं किन्तु तन्त्रता प्रतिपक्षबाधमात्रेणोक्तः। अत्र च प्रयाजाद्यनुष्ठानतन्त्रतार्थमुपोद्घातेनाद्यं वर्णकद्वयरूपम्। तत्र प्रथमवर्णके चिन्ता किं बहुकामपदं कर्तृविशेषकालकामनाम्वाङ्क्षतया विधत्ते विश्वजिन्न्यायात्प्रत्युत्पत्तिनियोज्यः कल्प्यः उत नियोज्यपरम्।

तत्र **पूर्वपक्षः**—षष्ठाद्ये हि नियोज्यापेक्षोक्ता न नियोज्यकामनाङ्गोयं न क्रियासाध्यतानुकूला स्वर्गसाध्यता। तदा हि कामनार्थे स्वर्गस्यैव बौद्धमुपादानं स्यादिति **नेष्टं परनिष्पत्त्य** इति न्यायात् कामनां प्रति प्रतीतं स्वर्गस्य प्राधान्यं हीयेतेति नियोज्यपरतोक्ता। इदानीं तु माभूत्सोपादानोपसर्जनत्वं निरुपादानोपसर्जनत्वन्तु भवतु स्वर्गप्रधानिकैवोत्पन्ना सती कर्तारं विशिनष्टु कर्तृविभक्त्यादिबलात्कर्तृपरतैव कामिण्दस्यास्त्विति शङ्का।

सा चेयमत्रैव तन्त्रत्वार्थे निरस्ता। न षष्ठे साधिकारत्वं हि तत्र व्युत्पाद्यम्। तच्च **विश्वजिन्न्याया**दपि सम्भवति कामिकर्त्रन्वययोग्यत्वाद्वा। तदा च प्रत्युत्पत्त्यधिकारी कल्प्यः प्रयाजादावपीति तेनाङ्गम्, तदा हि प्रयाजादावपि **प्रथमं स्वतन्त्रापूर्वधीः** अविशेषात् अनुवादशङ्काया अभावात्। तदा च सन्निहितयागोद्देशेन कर्त्रादिविधौ दर्शादिकमविवक्षितम् इष्टफलसाधनतया यागः कार्य इत्याख्यातोपसन्दानात् दवगवादृष्टस्य चेष्टफलस्याभावात् कालान्तरफलभाविसाधनतया पूर्वविषयतैव तदा च न **विश्वजिन्न्याया**पलापोऽपूर्वाधिकरणसिद्धान्तात् प्राक् क्रियावाक्यार्थत्वपक्षेऽपि चेदमविरुद्धम्। एवञ्च यदा कामिपुरुषत्वश्रुतेरपि नाधिकारिपरता तदा यावज्जीवश्रुतेः सुतरां किञ्च कालपरतैवागत्या। एतेन तदापि विदेवनादेरङ्गता। प्रयाजादेस्तु जीवनाधिकारप्रयुक्ताग्नेयाद्यङ्गेति मतमपास्तम्। तदा च प्रयोगविधिभेदभिन्नप्रयोगान्वयिनां देशादितन्त्रत्वाभावात्तन्त्रता न चाप्रयोजादेरङ्गतेति नाभिमतप्रयाजादितन्त्रतासिद्धिः।

ननु प्रयोगविधिभेदेऽपि तन्त्रताऽस्ति। यथा ऋद्धिसाधननानाकर्मसु जयाहोमस्य दर्शसूर्यग्रहादिनिमित्तकस्नानानां नानाब्रह्मवधादिपापक्षयार्थिनो वा प्रायश्चित्तस्य। मैवम्। न जयाहोमस्याधिकारिभेदे तन्त्रता। अस्तु तस्य तन्त्रता प्रयोगविधिभेदेऽपि सर्वविधीनां प्रति-

प्रयोगविधित्वाभेदात् । एवं प्रायश्चित्तस्यापि नानापापक्षयकामनानामेकदाऽभावात् । नानापापक्षयविषयैककामनावतस्त्वधिकारे नोक्तो दोषः । यत्र तु कामना प्राथम्यादिना विशेषो गृह्यते तत्र प्रसङ्ग एवेति ।

राद्धान्तस्तु—कामिपदस्य न कर्तृविशेषविनार्थत्वम् । तदा हि मुक्तकामनाविशेषणं वा स्यादुपलक्षणं वा ? नाद्यः । एवं हि क्रियाक्षेपलब्धे कर्तरि **लोहितोष्णीषन्यायात्** कामनैवाङ्गतया विधीयेतेति कर्तृपरता प्रतीयमाना भज्येत । न च नियोज्या × × × रुत्वेप्यनन्यप्रयुक्त (विमर्श) नियोगाक्षेपलब्धे नियोज्ये कामनामात्रपरत्वमिति वाच्यम् अभिधेयकामनापरत्वायोगात् । तथा यावदेव नाक्षेपस्तावत् कामिपदस्य नियोज्यपरतास्त्विति । न च श्रुते सति उपादानात्तत्कल्पनापि युक्ता । क्रियाक्षेपलब्धे तु कर्तरि **लोहितन्यायादेव** कर्तृसंख्यानियोगयोरभिधानमेकदा अभिहिते च स्वर्गकाम इति प्रथमापीति प्रागेवेह कर्त्राक्षेपः आवश्यकः ।

अन्ये त्वाहुः—अवगम्य हि पक्षनियोगं तद्धर्मञ्च नियोगत्वञ्च नियोगत्वात् सनियोज्यत्वमनुमेयं, न च नियोज्यमनन्तर्भाव्यनियोगः शब्देन बोधयितुं शक्य इति तत्तुच्छं न कामनाविशेषणं न च पुरुषविशेष एव कामनोपलक्षितो विधेयः कामनानियत (नियत ?)पुरुषविशेषोपलक्षकत्वायोगात् । न हि कश्चित्स्वर्गमेव कामयते तस्यैव भोजनादिकामत्वात् । अत एव न स्वर्गं कामयत एव स्वस्वापादौ कामनानुत्पादात् कदाचित् स्वर्गकामस्तु सर्व एव मुमुक्षोरपि स्वर्गकामनाया अविरोधात्तथा भवान्तरे मुमुक्षोरपि स्वर्गकामत्वसम्भवात् । अतो नास्य कर्तृविशेषपरता यदा यः स्वर्गकाम इत्येवञ्चोपलक्षणत्वे काललक्षणा उपसर्जनता स्यात् ।

ननु निमित्तमात्रं कामनास्त्विति राद्धान्ताभावशङ्का । सा तु कामनायोगात् स्वर्गस्य साध्यता या प्रयुक्ता जीवनाधिकारोपसंहारप्रसङ्गाच्च यावज्जीवश्रुतिवैयर्थ्यं स्यादिति × × × × पूर्णमासोदाहरणेऽभ्युच्चयोऽप्युक्तः अन्यथा नित्याधिकारस्यैव सदा कर्तव्यत्वे निमित्ताधिकारो न स्यात् । न च नित्यसमाप्त्यनन्तरं निमित्ते सति नैमित्तिकस्य पुनरनुष्ठानान्न नित्याधिकारस्य सङ्कोच इति वाच्यम् अविशेषेण तस्यापि द्व्यहकालत्वस्यासम्भवात् । एवं यावज्जीवश्रुतावपि याव × × × पर(?)त्वाज्जीवनव्याप्यत्वावगमात्तस्य च निमित्तत्वं विनाऽसम्भवात् । अधिकारिविशेषणत्वञ्च विना तदयोगादधिकारिपरतैवेत्युक्तं षष्ठे । एतेन निमित्तत्वबलाद्यावदधिकारी कल्प्यते तावत् क्लृप्ताधिकाराङ्गतैवास्य जीवनयोगस्य भेदेन होमवदिति निरस्तम् । आकांक्षायां धर्मग्रहकाले चाविशेषात्तथा एकदैव काम्यनित्याधिकारयोः प्रवृत्तिः । भेदनहोमस्तु प्रकृताङ्गत्वे पात्रस्य ज्ञाते तद्भेदनापेक्षितया विलम्बितोऽङ्गमित्याहुः ।

एतेन च × × × न्वयनिराकाङ्क्षाणामङ्गानां न नित्याधिकारान्वय इत्यावश्यकम्। यदि च जीवनाधिकारस्य निमित्तेनोपसंहारः स्यात्तदा कर्तव्याकरणरूपातिपातोऽपि निमित्ताभावेऽपि न स्यादिति जीवनकाम्याधिकारौ भिन्नावेवैताविति। एवं स्थिते नियोज्यपरत्वे द्वितीयवर्णके चिन्ता किमुत्पत्ति(त्य)पेक्षयाधिकारविधिः उत विपरीतम्।

तत्र **पूर्वपक्षः** :—विषयाधीनस्यैव नियोगस्याग्रेऽवगमादुत्पत्तेरेवाधिकारापेक्षा विश्वजिदादौ तथा दर्शनात्। अधिकारविधिस्तु सदा सुवाक्योपात्तविषयक एवोतोत्पत्तिमपेक्षते। अतोऽपेक्षितविधानानुरोधादधिकारविधिराग्नेयादीनुद्दिश्याधिकारं विदधाति। उद्दिश्यमानस्य च साहित्यमविवक्षितमिति प्रत्येकं फलमन्वर्थादधिकारविधिभेदे प्रयोगभेदेनानुष्ठानं न तन्त्रम्। एवं जीवनाधिकारः सर्वेभ्यो दर्शपूर्णमासावित्यत्राप्येषैव गतिः। प्रयाजादेरपि तदा प्रधानतैव तदुद्देशेनापि अभिकारविधानादिति **विवेकः**। सा मा भूदित्यपरे।

राद्धान्तस्तु—अश्रूयमाणाधिकारे उत्पत्त्यपेक्षयैवाधिकारान्वयः। श्रुताधिकारे तु नैवं तत्र ह्युत्पत्तिस्तु विधेयैव। एषा चात्र रीतिः—प्रथमनिर्धारितयागविशेषविषयके नियोगे ज्ञाते तत्र नियोज्यमन्वर्थः। स चैकस्तत्राभिधाने तदा प्रमाणाभावात्। एवञ्चाधिकारस्य साध्यस्याभेदे शास्त्राभेदो विप्रतिपन्नः। पश्चादाग्नेयादिवाक्येषु सन्निहिताधिकारानुवादाशङ्कयामुकेष्वाग्नेयादियागास्तेनाधिकारापूर्वेण गृह्यन्ते। ततस्तेषां विषयत्वन्तन्त्राभिधानान्मिलितानामेवारथीयते पूर्वप्रतीतैकाधिकारविध्यनुरोधात्। तथाभूतावभासजनकतयैव तेषामन्वयः। न च तेषां निरपेक्षाणां तथाभूतजनकतेति सापेक्षाणामेव विषयत्वम्। विनैव साहित्यलक्षणां यदि दुर्ग्रह एवाग्नेयादिविषया अनेके नियोगाज्जाताः स्युस्तेषाञ्चाधिकारापेक्षा प्रथममिति तदपेक्षयाधिकारान्वयः कल्प्यते तदा भवेदेव फलभेदः। न चैवमित्युक्तम्। न चोत्पत्तीरुद्दिश्याधिकारविधिः इष्यते विधिप्रत्ययप्रत्यासत्तेः (?) श्रुत्या यागस्यैवाधिकारोद्देशेन विधानात्। न चाधिकारी फलं वा विधातुं शक्यमनुपादेयत्वात् यागस्यैव विधेयत्वेन सम्भवात्। यागे विधेयत्वासम्भवे हि कथञ्चिदधिकारस्यापि विधेयता कल्प्येत न चैवमस्ति।

विवरणे तु यजेः समुदायानभिधायकत्वात् प्रत्येकमेव यागानां यजिपदवाच्यत्वात् प्रत्येकमेव नियोगान्वयात्प्रत्येकविषयाभिन्ना नियोगास्तन्त्राभिधानेऽपि साहित्यलक्षणां विना साहित्यानवगमात्। लक्षणायाञ्च प्रमाणाभावादिति **पूर्वपक्षः**।

राद्धान्तस्तु— उक्तं यथाभिधानं विषयत्वमिति मिलितानामेवैकेनान्वयेनानेकेषामभिधानम्। एकस्य चाधिकारनियोगस्यैक एव विषयोऽपेक्षितः। लक्षणां विनैव चात्र यथा-

भिधानं मिलितानां विषयत्वम्। असम्भवात्तु तन्त्राभिधानेऽपि ब्राह्मणाः कृषिं कुर्युरित्यादावेकैकान्वयः। तथा यत्र साधनतयान्वयस्तत्र साधनत्वस्य स्वरूपभेदेन न सहितान्वयः धवखदिरादावपि पदभेद एव लक्षणां विना न साहित्यम्।

अन्ये तु पूर्वावधारितैकाधिकारविध्यनुरोधात् सहितानामेव विषयत्वमिति तात्पर्येऽवधारिते लक्षणयैव सहितपरतावधार्यते। तथा दर्शपूर्णमासपदयोः समुदायद्वयपरत्वे धवखदिरादाविव साहित्यलक्षणायां तत्समानार्थयजिपदेनापि समुदायद्वयत्वेनैवार्थः उपनीयते। तस्मात् क्वचिद्द्विवचनान्तोपपदबलादन्योन्यसहितसमुदायपरत्वम्। क्वचिदेकवचनात् क्वचिद्बहुवचनात्साहित्यलक्षणेति। त × × ×मयुक्तञ्च।

अपरे तु साहित्यमात्राच्चेप्यमित्याहुः।

अङ्गानान्तु शब्दभेदात् क्रतुवत् फलान्यत्वम्॥११।१।५॥

किमङ्गानां भिन्नं कार्यमुतैकमेव। आद्ये तन्त्राभिधानात् तन्त्रं फलमित्युक्तेऽर्थाद्यत्र न तन्त्राभिधानाम् तत्तु भेदेन कार्यमिति सङ्गती(तिः इति) **पूर्वपक्षः**।

राद्धान्तस्तु— पूर्वत्रापि न तन्त्राभिधानात् कार्यं फलमेकं किन्तु नियोगस्यैकत्वात्। एकस्य नियोगस्यैकविषयापेक्षितत्वात्। इहापि चैक्ये नियोग एकमेवोपकारकमपेक्षते। स ह्युपकारकल्पकः। तेन क्लृप्ते पश्चात् पदार्थानां जनकत्वं कल्प्यते। अतो नियोगे नैकोपकाराकाङ्क्षिणा एक एवासौ कल्प्यते। भिन्नकल्पने प्रमाणाभावात्। यत्र तु दृष्ट उपकारभेदस्तत्र किं क्रियतां दृष्टत्वादेव। न चोत्पत्तिरेवोपकारकप्रमाणम्। येन तद्भेदादुपकारोऽपि भिद्येत सा तु स्वरूपायैव प्रभवतीत्युक्तम्। यदि ह्युत्पत्तिवाक्यं निरपेक्षस्योपकारजनकतया नियोमान्वयं बोधयेत ततो भवेदुपकारभेदः, न चैवम्।

ननु यद्युत्पत्तिवाक्येऽन्यार्थता नावगम्यते तदा **विश्वजिन्न्यायात्** स्वतन्त्रकर्त्रवगमेऽधिकार एव कल्प्यताम्। मैवम्। तथापि फलवत्सन्निधावफलं तदङ्गमित्युक्तम्। एवञ्च पदार्थस्वरूपं ह्युपकारकल्पनाया मूलं प्रमाणम्। तदभावे विकृतावुपकाराकल्पनात्। पदार्थभेदे च लोके उपकारभेददर्शनात्। इहापि जनकनिरूपणीयस्योपकारस्य भेद इति **पूर्वपक्षः**।

सिद्धान्तस्तु यद्यपि पदार्थास्तस्य निरूपका भवन्ति तथापि न ते कल्पकाः। किन्तु कार्यं तच्चैकमेवोपकारमाकांक्षया कल्पयति जनकभेदेऽपि सतीति। अत्र च तन्त्रमुपकारः सर्वेषामिति तदुक्तं **तद्वागामिन्यायात्**।

अत्र **केचिद्** सो(!) यद्युपकार आत्माश्रितो न कर्योत्पत्त्यपूर्वेऽद्रव्ये आत्माश्रितोऽपि देवतास्मृतिज उपकारो दात्रस्य दृष्टः स्वस्ति दार्ढ्यमपि न दात्राश्रितं किन्तु स्वस्ति दात्राश्रितं

दार्ढ्यं स च करणभेदोऽप्येकः कार्यस्यैक्याद्भेदे प्रमाणाभावात् कल्पनालाघवाच्च। उपपूर्वाश्रयत्वेप्यसावेक एवास्तु जात्यादिवत्प्रथमञ्च लाघवादेकस्मिन्नुपकारे क्लृप्ते पश्चात्संभूयोपकारकत्वसिद्धयेऽवान्तरापूर्वाणि स्वीक्रियते। अतस्तान्येवोपकारोऽस्तु किमन्यकल्पनयेत्यपि निरस्तम्। अङ्गापूर्वाण्यङ्गमिति। तत एवोपकारो न तु तान्येवोपकार इति।

अन्ये तु अगत्या हि देवतास्मृतौ तथास्तु इह तु साक्षात्सम्भवं करणाश्रितत्वमेव। अद्रव्यस्यापि समवायिकारणतास्त्येव करणार्थत्वग्रहरूपस्य च तस्य प्रतिकरणं भेद एव नहि कार्यैक्येपि मृद्दण्डादेरेका शक्तिः। अत एव विकृता चाग्नेयाद्युपकारस्य भेदेन प्राप्तिः। न चारादुपकारिमात्रजन्योऽसावात्माश्रित उपकारो भिन्नभिन्नसन्निपात्याहितविशेषकरणप्रतियोगितयानुग्रहरूप इति देशनालिङ्गाद्विशेषोपस्थितौ तद्भिन्नसन्निपातिनिरूपितोऽसौ गृह्यते। ततस्तन्निरूपिताङ्ग प्राप्तिरिति वाच्यम्। चित्त(त्र?)मित्तिवदाश्रयनिर्माणद्वारा उपकारजनकत्वसम्भवेऽस्याः कल्पनायाः अयोगादिति। प्रयोजनं कार्यभेदे विकल्पः। कार्यैक्ये त्वागामिन्यायात्समुच्चयः।

विवरणे तन्त्रोक्तेरस्तु प्रणामेकमवच्छेदकत्वम्। अङ्गानां पुनरतन्त्रोक्तेर्भिन्नमनुबद्धार्थवन्न त्वसतो वृत्तस्थानीयाग्नेयाद्यवच्छिन्नशास्त्रार्थीभूतापूर्वप्रत्यभिज्ञाने विल्वचिरविल्ववत्प्रयाजादिशास्त्रार्थस्य तस्य तस्य भेदे भेदेनोपकार इति **पूर्वपक्षे**—

राद्धान्तः—आग्नेयादिशास्त्रार्थस्यैकस्यावच्छिन्नस्यैकोपकाराकाङ्क्षेति तदेकत्वादेक एवोपकारः। तज्जननद्वारा चाङ्गानामवच्छेदकता न तु तेषामवच्छेदकतयैवान्वयाकाङ्क्षा वा। तथा चैकोपकारकतयैव तेषामन्वये तज्जन्योपकारसाध्यत्वं तस्याभिन्नत्वम्।

ननु चैकस्मिन् कार्ये आग्नेयादिप्रयाजादेरन्वयेऽर्थादन्योन्यान्वयाच्च करणे तादर्थ्यं स्यात्— मैवम्। तत्सामान्याकारे नेदमर्थ्यमकरणस्य करणार्थतयैवं विशेषनिष्ठम्। आरुण्यन्तु क्रय्यार्थतयैव विशेषनिष्ठमिति व्यापार्थमेवार्थाद्द्रव्यान्वयीत्यर्थभेदः।

एषा पुनरत्र रीतिः—प्रयोजनप्रयोजनितामात्रे साधिकारविधिग्रहीतानामाग्नेयादिप्रयाजादीनां करशिर × × × पूर्वभावनात्वे करणत्वेनाग्नेयादीनां विनियोगान्नियोगसाधनत्वम्। तत्र यत्र प्रयाजादयो जनकतया योग्यास्तस्योपकारस्य प्रकरणेन कल्पनम्। स च करणानुग्रहरूपतया करणनिष्ठ एव शक्तिरिव साधननिष्ठा। ततः करणनिष्ठे नियोगसाधन उपकारे साधनतयोपादानेन प्रयाजादीनां जनकत्वं कल्प्येत इति भवति करणार्थता नियोगसाधनता च आरुण्ये च नियोगसाधनीभूतक्रयसाधनतयैव नियोगसाधनेन पुनर्द्रव्यस्य नियोगसाधनताकार आरुण्यविनियोगो येनारुण्यतादर्थ्यं स्याल्लौकिकस्वरूपसाधनतामात्रेण च न शेषतेति सर्वत्र नियोगादेव

शेषता । कृतेस्तु नितं(त्यं) पदादेव कृतिप्राधान्येन नियोगावगतेः शेषतासिद्धिः । करणतदुपकारकयोश्च महाभिधाननियमात्सर्वं हि कार्यं करणतदुपकारान्वितमेव बोध्यत इति ध्येयम् ॥

एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत् स्यात् ॥ ११।१।११ ॥

यदेकोपकारजनकत्वं तत्सर्वेषां सम्भूय न चापूर्वपक्षः । यद्यसावेक उपकारस्तथापि तन्त्राभिधानाभावान्न युगपदधिकरणप्रबलतेति न सापेक्षाणां जनकत्वमिति स्थिते **विवेकः**—एकत्र युगपदन्वयान्निरपेक्षश्रुतेश्च सम्भूयासम्भूय वेति विधान्वयभेदे शक्तितः फलभूसतो बाध्यवस्तेति । अत **एकेनापीति** सूत्रं न त्वपरे वार्थे **पञ्जिका**स्वरमस्तु निरपेक्षश्रुतेर्निरपेक्षाणामेव साधनता । अत एव एकेनाप्युपकारसम्भवात् न सापेक्षाणां जनकतेति एकेनाप्युक्तम् ।

राद्धान्तस्तु—यद्यप्यङ्गस्वरूपाभिधाने तन्त्रता नास्ति तथापि कार्यान्वयेन विशेषः एकत्वात् कार्यस्य तत्र च सर्वाङ्गपंक्तेरेकदान्वयः खले कपोतपंक्तेरेव । तत्र यद्यपि कार्यैक्ये × × × नापिनान्वयस्य तन्त्रता किन्तु ते भिद्यन्ते तथाऽप्येकदा एकस्मिन् सर्वान्वयसिद्ध्यर्थमेक एवोपकारः कल्प्यते । सर्वेषां जनकत्वमुपादानकल्प्यम् । उत्पत्तौ स्वरूपमात्रं निरपेक्षं जायते न तु नियोगान्वयोऽपि । न ह्युत्पत्तिवाक्यमेव व्रीहियवादिवदुपकारसाधनतया नियोगान्वयमभिधत्ते । तदेवं प्रयोगवचनावगतप्रयोगयौगपद्यापेक्षता कल्प्या ।

अन्ये त्वाहुः—यद्यपि विकृतादुपकारः पदार्थानां युगपत् स्थापको यथा तथा प्रकृतावन्यो नास्ति तथापि तात्पर्यावधारणकाले सर्वेषां नियोगान्वयस्य क्रमेणावगतौ पुनर्युगपन्नियोगेनोपस्थितौ सर्वैर्युगपदन्वयः ।

अपरे तु क्रमेण पदान्तरैरर्थनियोगान्विते बोधिते नियोगोपस्थितावनेकपदान्नान्वितम् । एकदा लिङ्गादिरर्थमाहेत्याहुः । तद्व(दु ?)च्छृङ्खलम् । किन्तु यत्र कलयं कल्प्यते तत्र नित्यान्वयबलान्मिलितानामेव कार्यं भवति । अग्निप्राजापत्योरिव देवतात्वमिति द्वादश उक्तम् ।

ननु युगपद्ग्रहेऽपि प्रत्युक्तिलाघवाय सम्भूय कार्यमस्तु—मैवम् । यथा ग्राहकं द्वारं यथा द्वारं प्रयोगस्तथा प्रयोगः(?) । प्रयोगविधिश्च भिन्न इत्येव गत्यैवं कल्प्यत इति विरोधाधिकरण उक्तम् ।

विवेकस्तु व्रीहियवादिकं दृष्टे कार्ये अनपेक्षश्रुतत्वाद्विकल्पार्हमिति आक्षिप्तप्रयोग-

Scanned with OKEN Scanner

व्यक्तिभेदापेक्षमगत्या स्वीकृतम्। इह तु प्रयोगता क्रियावत् प्रयोज्यान्वयिन्येव युक्ता प्रयोगव्यक्तिभेदापेक्षञ्च लाघवम्। विधिव्यापारापेक्षया च गौरवमेवेति।

अन्ये तु व्रीह्यादावपि न दृष्टकार्यत्वं विकल्पे हेतुः सम्भूयापि दृष्टान्तसिद्धेः। किन्तु निरपेक्षश्रुतिरेव। सा चात्रापि तुल्या। तथाप्यत्र नियोगीयोपकारानुकूले उत्पत्त्यपूर्वे निरपेक्षश्रुतेः सार्थकत्वान्नित्याम्नानाच्च प्रयुक्तिगौरवादिकमपीति तत्त्वं ज्ञातुं इदन्तूच्यते प्रकर(?)क्लृप्ते उपकारे उपादानात्सर्वेषां जनकत्वं कल्प्यते। सम्भूयाश्चौपादानिकः। नियोगीयोपकारसम्बन्धो वौपादानिकः(को) विशिष्टविधाविव। यद्वा प्रकरणेन यत्र ते पदार्थाः साधनत्वेनैवानुयोग्याः स उपकारः कल्प्यते न तु तत्पदार्थजन्यतयैव प्रकरणेन तत्कल्पनम्। यथा विनियोज्यान्वयगममत्र योग्यमपूर्वं प्रथममुच्यते न तु नियोज्यान्वितपरत्वेनैव। अतस्तत्साधनत्वं पदार्थानामौपादानिकम्। अत्र च नित्ये सम्भूयासम्भूय वाऽङ्गानां कार्यमिति **सर्वशक्ता**-(६।३।१) वुक्तम्, इह तु काम्येपि तद्वदस्त्विति शङ्का निरस्तेत्याहुः।

वस्तुतस्तु काम्ये नित्ये च चिन्ता। सा यथा तथोक्तमेव। कृते च विकल्पनिरासे सर्वशक्तौ नित्यनिमित्तानुरोधात् किञ्चिदङ्गत्यागेन नाप्यधिकारसिद्धि(रणा?)स्योक्ता काम्येधिककाम्येनाङ्गहानमित्युक्तमिति।

कर्मण्यारम्भभाव्यत्वात् कृषिवत् प्रत्यारम्भं फलानि स्युः ॥११।१।२०॥

ननु कर्तृवाच्यतातृतीय एव निरस्ता किमत्र तन्निरासेन। अथ कर्तृवाच्यत्वेनानृतं वदेदिति निषेधस्य क्रत्वर्थता न सिद्ध्यतीत्येतदर्थं कर्तुर्वाच्यत्वं तृतीये इह तु कर्तुर्वाच्यत्वे तस्य प्रधानत्वात् स कर्मणा संस्कार्यः। संस्कृतस्य च पुनः संस्कारो नास्तीति पुनरनुष्ठानं कर्मणां न सम्भवतीत्येतदर्थं कर्तुर्वाच्यता निरस्यते—मैवम्। तथापि प्रयोजनमात्रान्यत्वं न्यायस्तु न भिद्यते। एवन्तर्हि अस्मै प्रयोजनाय तस्य स्मारणमात्रमिदं तदा **प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत** इति हेत्वभिधानं स्मारणे व्यर्थमिति न वाच्यम्। कृतप्रत्ययेष्वेव पाचक इत्येवमादिषु प्रत्ययार्थः प्रधानं नाख्यातेष्वपीति दर्शयितुमिदमुक्तम्। यद्वा कर्तुर्वाच्यतानिरासोऽत्रैवोपयोगीति वक्तुं पुनरुक्तिः। अनृतव(वा)दनप्रतिषेधस्य वाच्येऽपि कर्तरि प्रयाजादिवदङ्गतासिद्धेः। न च कर्तरि वाच्ये प्रयाजादिरङ्गतानिषेधमात्र एवाङ्गत्वस्य तृतीयोक्तत्वात्। अत एव निषेधमात्रं तत्रोदाहरणमिति। तद्द्वयमपि न युक्तमिति **गुरुः**। स्मारणं तावन्मन्दमेव। तथा कर्तुर्वाच्यत्वेऽनृतवदनकर्तृविशेषणविशिष्टत्वेन नियोज्यार्हस्य श्रुतत्वात् स्ववाक्य एव विषयनियोज्यलाभात्क्रत्वर्थता। प्रयाजादेस्तु कर्तरि वाच्यत्वेऽपि क्रत्वङ्गता अप्राप्तप्रयाजकर्तुर्विधेयत्वं वाच्यम्। न च कर्तृविधावधिकारी श्रूयते। अत उपादेयतया प्रयाजादीनामेव विधेयतेति तृतीय एवोक्तम्।

Scanned with OKEN Scanner

गुरुस्तु यद्यपि कर्तुर्वाच्यत्वं तृतीय एव निरस्तं तथाप्यत्राक्षिप्तः कर्ता प्रधानमिति पूर्वपक्षितवान्। पाचको देवदत्त इति वदप्रयोगदर्शनात्। न हि गुणभूते करणादावर्थ-प्रयोगोऽस्ति। ततश्च कथं विशिष्टः कर्ता प्रतीयतामित्याख्यातं प्रयुङ्क्ते। गम्यमानस्यापि भवति विशेषणं नीलं षड्भाव इतिवत् कर्तुश्च प्राधान्ये तदर्थं कर्म तदा च न कर्म कर्तु-रुत्पादकमिति संस्कारकमेव वाच्यम्। संस्कृतश्च न संस्क्रियते। समानरूपे संस्कारे सति तद्रूपसंस्कारानुत्पादात् दर्पण इव मार्जनेन। अत एव नोपनयनं पुनः पुनः। यदि च वचनं स्यात्तदैव पुनः क्रिया। अनुभवाभ्यासे तु संस्कारान्तरमेव प × × × आद्यज्ञानजनित-संस्कार एवोद्बोध्यत इति **केचित्**। एवं लोकव्युत्पन्ना क्रिया कार्यत्वमपि स्यात्। तस्मात् **प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत** इत्यनेनापि न्यायेन प्राधान्यमेव कर्तुरुक्तं न वाच्यत्वमर्थ-प्रयोगात्। न च वाच्यत्वेनैव प्राधान्यं वाच्यस्यापि वाच्यत्वस्याप्राधान्यात्। किन्तु प्रयोगैदम्प-र्यादेव प्राधान्यम्। इह तु कर्तृपरः प्रयोगो यथा पाचकादिषु।

ननु कथन्तर्हीदं भाष्यम्—तयोः कर्ता प्रधानमित्युपसंहारात् कर्तोच्यत इत्यस्य भाष्य-स्यायमर्थः कर्तारं प्रति गुणभूतसंख्योच्यत इति। अत एव **प्रकृतिप्रत्ययौ प्रत्यार्थं सह ब्रूत** इति वदनभिधेये प्राधान्यमात्रेण ब्रूवः प्रयोगमाह—न वाच्यत्वेन न हि प्रकृत्या प्रत्ययार्थ उच्यते। अत एव राद्धान्ते कर्तुः प्राधान्यमेव निरस्यत इति **भाष्यकारः न कर्ता न क्रिया प्रधानं भावप्रधानमाख्यातमिति** वदन् यदि वाच्यत्वेन पूर्वपक्षितं स्यात्तदा तदेव निराकुर्यात् न कर्ता प्रधानं न वा भावना किन्त्वन्योत्पादकत्वावस्थो भावस्तन्निष्ठमा-ख्यातं सर्वं कार्यवाचकन्तु पद कृतिमभिधातुं प्राधान्येन न शक्नोतीति कार्यगुणतयैव कृत्यभि-धायकमिति न तत्रापि भावनाप्राधान्यम्। यथा च सर्वाख्यातैर्भावनोच्यत इति स्थाना-न्तर उक्तम्।

राद्धान्तस्तु क्रिया चेदाक्षिपति गुण एव कर्ता स्यात् साधनत्वेन तदाक्षेपात्। अधिकारितया क्षिपतीति चेन्न कर्मणोऽधिकारी व्यभिचारान्नियोज्यान्वयः कर्मणः पुरुषार्थताऽ-सिद्धावधिकाराक्षेपायोगात् नियोज्यान्वयश्चेत्तदा योग्यतयाऽपूर्वमेव लिङ्वाच्यं स्यात्। अतः सत्येव कर्तृसंस्कारार्थे यागादौ पश्चादेव नियोज्यान्वयो वाच्यस्तदा च कर्तुः प्राधान्यमेवेषितव्यम्। तच्चायुक्तमित्युक्तम्। न च लिङाप्यधिकारिसंख्योच्यते। अनुप्रयोगश्चान्यथासिद्ध इति तिङभिहितायां प्रथमाप्रयोगात् ततश्च कर्तुरप्राधान्येऽपूर्वं वाक्यार्थः सेत्स्यति। तदा चाधिकारा-वृत्तौ पुनरावृत्तिप्रसङ्गः। न चापूर्वेऽपि सति तुल्यमितीयमपूर्वान्तरं न सम्भवतीति प्रमाणमस्ति अपूर्वत्वादेव। न च तस्यापि संस्काररूपत्वं सामान्यकल्पनायामस्ति प्रमाणमिति न्यायात्

Scanned with OKEN Scanner

संस्काररूपत्वे प्रमाणाभावात्। किन्त्वधिकारावृत्तौ शब्देन पुनः कर्तव्यत्वेऽस्य बोधितत्वाद्विरोधादेव न तस्य संस्काररूपता। पूर्वपक्षे तु कर्तुः स्वतः सिद्धत्वात् क्रियेप्सितत्वं संस्कार्यतयैव सकृच्च संस्कार इति तत्पूर्वको नियोज्यान्वयोऽपि सकृदेवेति वाच्यम्। लघ्व्यां तृतीयोक्ते कर्तृवाच्यत्वाक्षेपादपुनरुक्तिः युक्तिश्च कर्तुं फलमाक्षिप्तश्च कर्ता गुणः स्यादतः प्रधानं कर्ता लिङ्वाच्यः संस्कार्यश्च।

राद्धान्तस्तु—नियोज्यत्वेनान्वयात्पुंसः फलिता कर्ताक्षिप्तः क्रिया गुण एवेति। अङ्गप्रधानानां कार्यं तन्त्रमित्युक्ते किं प्रधानानां पुनरनुष्ठाने पुनः कार्यं न वेति चिन्ताप्रसक्तिकोटिः। तथात्रत्यपूर्वपक्षे नापूर्वं प्रधानं तदा च क्रियावाक्यार्थत्वपक्षेनाङ्गप्रधानताग्नेयादिप्रयाजाद्यो विनिपूर्वनयाक्षेपात्सङ्गतिः॥

अवघातादीनामातण्डुलनिर्वृत्तेरभ्यासाधिकरणम्॥५॥

क्रियाणामर्थशेषत्वात्प्रत्यक्षतस्तन्निर्वृत्त्याऽपवर्गः स्यात्॥११।१।२७॥

व्रीहीनवहन्तीत्यादौ किं सकृदुद्यमननिपातनं उताभ्यस्तं पूर्वपक्षः न तण्डुलीभावपर्यन्तमुद्यमननिपातनं हन्ति वाच्यं सर्वौषधेऽपि तथा प्रसङ्गात्। अतः सकृदेव कार्यम्। एवमदृष्टार्थताऽपि न दोषः। श्रुताद्धि प्रयोजनं न प्रयोजनतः श्रुतम्।

नन्वनपेक्षाभ्यासानभ्यासौ साधारणमुद्यमननिपातनमात्रं हन्ति वाच्यमस्तु। तदा च किण्वा(श्वा)दौ नाभ्यासः प्रयोजनाभावात्। व्रीह्यादौ त्वभ्यासाश्रयणं विध्यपेक्षिततण्डुलार्थं न शब्दार्थतया श्रुताविरोधे प्रयोजनतोऽपि श्रुतमिति कथं **पूर्वपक्षः**—उच्यते—उद्यमननिपातनमात्रस्य न तण्डुलादिसिद्धिः प्रयोजनं साभ्यासस्येति चेत्तर्ह्यभ्यासात् दृष्टं दृष्टाच्चाभ्यास इत्यन्योन्याश्रयं स्यात्।

राद्धान्तस्तु—हन्त्यादीनां नियोगगृहीतानां किमभ्यासमाक्षिप्य दृष्टं द्वारमस्तु ततो दृष्टमिति सन्देहे दृष्टत्वबलादभ्यासाक्षेपः। इष्टफलसाधनतया च धात्वर्थमाख्यातोपसन्धानात् प्रतीयते हन्तिधात्वर्थस्य वैतुष्यमिष्टं लोकतो ज्ञातं तथा च नियोगसाधनव्रीह्यादौ वैतुष्यं जनयन्नवघातः कार्येणाभिविधावगत्याभ्यासाक्षेपः। स चौपादानिक इति भ(भ्र)मः। यत्र तु लोके दृष्टमिष्टं न भवति तत्रादृष्टमेवेति नाभ्यासाक्षेपः फलावच्छिन्नक्रियापचयपरता च धातोरुक्ता। अतोऽभ्यासः कल्प्यते नादृष्टम्। अदनीयतासिद्ध्यर्थमवश्यमिष्यपेक्षितवैतुष्यसाधनमपेक्ष्यमिति॥ लघ्व्यां यदि व्रीहीनवहन्तीत्यादौ तण्डुलीभावान्तःक्रियापचयो धात्वर्थस्तदा सर्वौषधेऽपि तथास्तु। कषायादौ च हन्त्यर्थानन्वयाच्च लक्षणास्तु॥

Scanned with OKEN Scanner

राद्धान्तस्तु—सकलप्रयोगार्थमुद्यमननिपातनमात्रं वाच्यम् न तु कषाये लक्षणा। इष्टार्थत्वं त्वभ्यासाक्षेपो न धात्वर्थतया। प्रयोजनार्थन्तु यथापूर्वमभ्यासस्तथाऽत्रापीति प्रसक्तिकोटिः॥

प्रयाजादीनामङ्गानां सकृदनुष्ठानाधिकरणम्॥ ६॥

क्रतुवद्वानुमानेनाभ्यासे फलभूमा स्यात्॥११।१।२९॥

किं हन्त्यादिवत्प्रयाजादिकमभ्यसितव्यं न वा?

पूर्वपक्षः—एकस्मिन्नपि करणे उपकारार्थे सकृदसकृत्त्वाभ्यसितव्यं प्रयाजादि अभ्यासानभ्यासोदासीनत्वाच्छास्त्रस्यातः पुनः पुनरङ्गानि कृतान्यन्यमुपकारं करिष्यन्ति। उपकारप्रचये च करणमपि फलप्रचयं करिष्यतीति फलभूमार्थमङ्गान्यभ्यसितव्यानि प्रधानमिव पुनः पुनः फलार्थे नामार्थे हि संख्याश्रुतेरेकस्यानेकस्य वोपादानं नियतं नाख्यातान्ते संख्याया अश्रुतेः। अतोऽविशेषादभ्यासोऽनभ्यासश्चेति।

राद्धान्तस्तु—अधिकारावृत्तौ प्रयोगावृत्तेर्भवतु पुनः पुनरनुष्ठानम्। प्रधानशास्त्रानावृत्तौ नाङ्गशास्त्रावृत्तिः प्रधानशास्त्रस्यैवाङ्गप्रधानविधायकत्वात्। न त्वङ्गशास्त्रं सत्प्रधानेनैकम्भवति येन कथञ्चित्फलभूमा कल्प्येत्। अतोऽभ्यासे मानाभावादर्थादेवाभ्यासासिद्धिः। लोके तु मानान्तरात्तथेति।

बहुवचनस्य त्रित्वपरत्वे कपिञ्जलाधिकरणम्॥ ७॥

बहूनामेककर्तृ प्राप्ते विकल्पः स्यात्[1]॥ ३८॥

कपिञ्जलानालभते इत्यादौ किं त्रयश्चत्वारो वा आलब्धव्या उत त्रय एवेति। तत्र भाष्ये बहुवचनस्य त्रित्वम्वाच्यम्। चत्वार इत्यत्र त्रित्वानन्वयाल्लक्षणेत्युक्त्वा उक्तं बहुशब्दोऽयं बहिर्मा × वृद्धावित्यत्र उप्रत्यये यौगिकः। त्रित्वाधिकत्वञ्च तत्रोपाधिरिति नैकस्माद्वृद्धेर्द्वित्वे तस्य प्रयोगः। एकशत्यैव चतुरादावपि परार्द्धपर्यन्ते प्रयोगसम्भवाल्लक्षणाया अयोगात्।

ननूपाधिकल्पनापेक्षितया द्वित्वमेव वाच्यमस्तु, मैवम्। विनिगमना(या)यां प्रमाणाभावात्। प्रथमचतुरादावप्रयोगात् प्राथम्यं विनिगमनाहेतुरिति चेत्—मैवम्। प्रयोगेन

१—'बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यादि'ति पाठोऽन्यत्र दृश्यते।

THE MADRAS SANSKRIT COLLEGE
MYLAPORE, MADRAS-600004

प्राथम्यं उपादाने तु प्राथम्यं न शक्तिनिर्द्धारकं शक्तिधीकालेऽनुपस्थानात् तथा लक्षणायां मुख्यार्थः प्रतीत्यन्वयी भव। न चात्र त्रित्वसम्बन्धित्वेन चतुरादिधीः। एवञ्च त्रित्वधीपूर्विका चतुरादिधीः। अतो नैव पेक्षया(?)। त्रित्वस्यैवाङ्गत्वमिति सिद्धान्तो हेयः। किञ्चैवं नावमिकोत्तराधिकरणेन गतार्थता स्यात्।

केचित्तु—त्रित्वानामप्यनेकत्वात् त्रित्वेऽपि वाच्ये उपाधेः कल्प्यत्वात् वरं चतुष्ट्वादौ मुख्यत्वाय द्वित्वाधिकत्वमेवोपाधिरस्त्विति। तत्तुच्छम्। तथा यदि चतुर इत्यादौ लक्षणया बहुवचनं तदा ऋतोर्नैकवचनं प्रयुज्यते। द्वित्वे वा ऋतोर्न बहुवचनस्य लाक्षणिकः प्रयोगः। तथा विभक्तौ न लक्षणा व्युत्पन्नेति द्वित्वाधिका सर्वैव संख्या बहुवचनबोध्येति तदिदं भाष्यकृता पूर्वपक्षसम्भवार्थमुक्तम्।

पूर्वपक्षस्तु—सर्वासामेव संख्यानाम्विधानादङ्गत्वे विकल्पः। एकादेय········ येत्यादिवत्। फलभूमा च कल्प्यः। महतस्तु पशोरुपादानं नान्योपादानापेक्षमिति न तत्र फलभूमा। किञ्च विशेषेण कल्पद्वये बोधिते फलभूमा त्रित्वादि च विशेषेणैव बोध्यते। सम्बन्धग्रहे तूपलक्षणमात्रं द्वित्वाधिकत्वम्। अतो न पशोर्महत्त्वे फलभूमा। एवञ्च द्वित्वाधिकत्वस्योपलक्षणत्वे बहुवचनात् त्रित्वचतुष्कादिनैव च द्विः शाब्दी उपलक्षणस्यारूपत्वात्। ततश्च सर्वासां संख्यानामङ्गत्वमतः स्वर्गकामश्रुतेरिवाङ्गैर्न पश्चाद्भाव्यपादानगौरवेण तत्संकोचः। किञ्च तत्र सर्वाङ्गे युक्तेऽपूर्वे शक्तस्यान्वययोग्यत्वात्सङ्कोचः। इह तु सर्वविनियोगाद्विकल्पः फलभूमा च कल्प्यतां श्रुतानुरोधेन विकल्पकल्पनयोर्दृष्टत्वात्।

राद्धान्तस्तु—यद्यपि शब्दात्सर्वसंख्याधीस्तथापि नियोगार्थयोस्त्रित्वस्यैव न चतुष्कादेर्ग्रहैकत्ववत्पश्वेकत्वमपि पश्चाद्भाविद्वारान्वयान्नियोगान्वितम्। अनुष्ठानपर्यन्तञ्च शास्त्रम्। अत उपादानाभावे तदनिर्वाहान्न चतुरादेर्विनियोगः किन्तु त्रित्वान्वयपरे शब्देनान्त······। यकी प्रतीतिरेकशक्तिगम्यत्वात् त्रित्वप्रतीतिरेव प्रयोजनवती-प्रवृत्त्युपयुक्ततया चतुरादिप्रतीतिस्तु न प्रयोजनवतीति पश्चात्तात्पर्यमेव धार्यते। अनेकार्थादिवार्थान्तरं त्रित्वोपादानपूर्वकं हि चतुराद्युपादानं फलभूमकल्पनापेक्षया विलम्बितान्वयनिर्वाहकम्। अतो यत्र गुरुकल्पेऽपि भेदेन श्रुतिस्तत्रैव फलभूमा अधिष्ठानं ह्युपादेय(यं) न तु संख्या। उपादेयावच्छेदिका हि सा। न चात्र त्रित्वाधिष्ठानमन्वयादा(दा)य चतुराद्युपादानम्भवतीति त्रित्व एव शास्त्रं पर्यवसितम्।

ननु कदाप्येकयत्नादेव चतुरादि लभ्यते—नैवम्। तदापि ज्ञानपूर्वक(?) उपादाने गौरवमेव व्यापाराधिक्यम्। उपयुक्तस्य स्वस्य त्यागोऽपि व्यर्थः। तथा कपिञ्जलादौ द्रव्ये सत्येव

Scanned with OKEN Scanner

संख्या ज्ञानावच्छेदिका। ज्ञानञ्च तस्या उत्पन्नाया उपादानकाले प्रत्यक्षम्। उत्पत्तिश्च त्रित्वैकत्वज्ञानात् त्वेकचतुष्कज्ञानबलात्। अवान्तरपूर्वपूर्वसंख्याज्ञानमविना उत्तरोत्तरसंख्याज्ञानानुत्पादात्। अत एव च गणनापेक्षा तदा चादौ त्रित्वज्ञानस्यावश्यकत्वात्तदेकावच्छेदकमङ्गमस्त्विति। चमसाध्वर्यवस्तु दश दश चमसाध्वर्यव इति विकृतौ व्यपदेशात्।

ननु "स यदि तावद्वैदिकीष्वि" ति (११-१४३) भाष्यं चतुष्कादेर्वैदिकतां ब्रूते—मैवम्। यदीत्यन्वारुह्य वादोऽयं मासमिच्छन्नित्युक्तेर्लक्ष्यते। वैदिकत्वे हि मांसस्य रागाच्चतुराद्युपादानं नोच्येत।

विवरणे एकं बहुत्वं द्वित्वाधिक्यरूपं त्रित्वादिषु तदेव वाच्यम्। संख्यामात्रं वा द्वित्वाधिकत्वोपाधिकं वाच्यम्। ततोऽधिष्ठानभेदोपाधिकं त्रित्वादिभेदो निर्देश्यं दिगिव प्राच्यादिपदैः। तथैकमेव विनियुक्तं तदुपादाने तदधिष्ठानविकल्पः। अनेकार्थेन भक्ष्यादिपदे नैकस्यैवार्थस्य विनियोगादेकोपादानम्।

राद्धान्तस्तु—तथाप्यधिष्ठानानामेवाधिकानामुपादानमयुक्तम्। अत उपादानार्थत्वाद्विनियोगस्योपादानवशेन विनियोगसंकोचादभिधानसंकोचः प्रत्यवरोहादिति॥

उत्तरादोहनानुवादाधिकरणम्॥८॥

उत्तरासु यावत्स्वमपूर्वत्वात् ॥११।१।४६॥

सान्नाय्ये दोहनं प्रकृत्य श्रुतम् "वाग्यतस्तिस्रो दोहयित्वा विसृष्टवागन्वारभ्य तूष्णीमुत्तरा दोहयतीति"।

तत्र किं तिसृणां दोहनमुत यावत्स्वमिति।

ननु च यत्र बहुत्वमुक्तं विधीयते तत्रोपादाने संख्यपेक्षया अपादानबलात्संख्याभिधानसङ्कोच उक्तः। इह तु "नास्यैतां रात्रिं कुमारा अपि पयो लभेरन्निति श्रुते लक्षितं सर्वदोहनमभिधीयते। सर्वदोहे हि तेषां पयो लाभनिषेधो दृष्टार्थः सम्भवी ततश्चोत्तराणामपि सर्वासां दोहने प्रप्ते (प्राप्ते) तदनूद्यान्वारम्भणमात्रमत(तो) विधीयत इति विधिलाघवं स्यात्। अन्यथा त्वन्वारम्भणविशिष्टोत्तराविशिष्टदोहनमविधीयेत। ततश्चानुपादेयानामुत्तराणां संख्यैवाविवक्षिता पूरे त्रित्वमतो यस्य यावत्य उत्तराः स तावतीर्दोहयेदिति कथं पूर्वपक्षः।

उच्यते—पयो लाभो हि दाने दत्तं हि लभ्यते। अतो लक्षितदाननिषेधविधिरेवादृष्टार्थः ·········मुख्यार्थ एवं न तु सर्वैः पदैरमुख्यैः सर्वदोहो लक्ष्यते।

Scanned with OKEN Scanner

राद्धान्तस्तु—नेयं लक्षणा किन्तु पयोलाभनिषेध एवायं नियोगीयसर्वदोहज्ञापकतया विधीयते दृष्टार्थः। यद्वा किं लक्षितो दाननिषेधो विधीयतामुत सर्वदोहः इति सन्देहे दृष्टार्थत्वात्सान्नाय्यविधिसौकर्याद्विधिलाघवाच्च सर्वदोहविधिरेव न एता(?)सर्वदोहो लक्ष्यते पयोलाभस्तदुपसर्जनमिति ॥

आघाराद्यङ्गानां तन्त्रेणानुष्ठानाधिकरणम् ॥६॥

प्रधानकर्मार्थत्वादङ्गानां तद्भेदात्कर्मभेदः प्रयोगे स्यात्। ११।१।५३॥

किं प्रयाजादिकं प्रतिकरणं भेदेनानुष्ठेयं न वा? तत्र प्रतिकरणं भेदेन प्रयाजादेर्विनियोगात् विनियोगनिमित्तकत्वाच्चानुष्ठानस्य यथाविनियोगं भेदेनैवानुष्ठानं न च देशादितन्त्रत्वात्प्रयाजाभेदादुद्देशविशेषाग्रहाच्च तन्त्रमनुष्ठानमिति वाच्यम्।

प्रयोगाङ्गं हि देशाद्यनुष्ठानाक्षेपापेक्षम्। अनुष्ठानाक्षेपोऽपि विनियोगापेक्ष इति देशादिरप्यावृत्तप्रयाजाद्यनुष्ठानक एक एवानुष्ठानाङ्गम् उद्देशविशेषग्रहोऽपि प्रधानपाठक्रमादस्ति। अन्यथाऽग्नीषोमीयाङ्गे आद्यप्रयाजे कृते आग्नेयस्य द्वितीयः प्रयाजः स्यात्। व्यक्तितया प्रयाजाऽभेदोऽसिद्धः। शास्त्रार्थतया त्वसावावापेऽप्यविरुद्धः। तथा यथा प्रधानं फलबाहुल्यार्थमावृत्त्या क्रियते तथा······यपि प्रतिकरणमुपकारभूयस्त्वेन फलबाहुल्याय भेदेन कार्याणीति **पूर्वपक्षः**।

राद्धान्तस्तु—विनियोगभेदेऽपि कार्यार्थमनुष्ठानं कार्ये च न(गृ)ह्यते विशेषः प्रयाजादेरनुष्ठेयस्य देशादेश्चाभेदात्। आक्षिप्ते च प्रयोगे देशादितदङ्गम्। तत्र पदार्थभेदे अगत्या तदावृत्तिः। **'प्रतिप्रधानं गुणा आवर्तन्त'** इति न्यायात् तदभेदे तु न देशादेरावृत्तिस्तदङ्गेऽपि कल्प्या। न गृह्यते विशेषो येन तदावृत्तिः कल्प्येतेति देशादेः प्रयोगानुबन्धभूतस्याभेदादनुबद्ध्यमानः प्रयोगोऽप्यभिन्नः। तथा सह प्रयुक्तेरपि तन्त्रताऽवगम्यते। तथा च क्रमापेक्षाया एवाभावात् किं प्रधानानां पाठक्रमेण प्रयाजादेश्च नियोगेऽन्वयः। सकृदेव सकलकरणार्थतापि सकृदेवेति न तत्र क्रमो येन विशेषकरणार्थता स्यात्। अतः प्रधानापूर्वाक्षिप्तप्रयाजानुष्ठानसाध्यत्वे नोत्पत्त्यपूर्वं सर्वार्थमभिन्नमेवेति। सन्निपातिनान्तु स्वकारकारम्भफलावगमादावृत्तिरेवेत्याद्य एव प्रपञ्चितम्॥

कृष्णग्रीवस्य भेदेन ग्रहणाधिकरणम् ॥१०॥

भेदस्तु कालभेदाच्चोदनाव्यवायात्स्याद्विशिष्टानां विधिः प्रधानकालत्वात् ॥११।१।६८॥*

क्वचिच्छ्रुतं "आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुं आग्नेयं कृष्णग्रीवम्"। तत्र सन्देहः—तत्र किं आग्नेयद्वयस्य तन्त्रमनुष्ठानमुत भेदेनेति। तत्र **पूर्वपक्षी**—ऐन्द्रदधिपयसोरिवाग्नेययोरित्यपि तन्त्रतां मन्यते न त्वाग्नेयस्यैकस्य सौम्यपूर्वताऽपरस्य तत्परता तद्द्वयमध्यस्थतारूपः क्रमः सौम्यस्येत्यादि हीयेत। न हीयतां क्रमस्यानङ्गत्वात्। यदि क्रमोऽङ्गं स्यात् तदा सौम्यपूर्वत्वादेकमपूर्वं तत्परत्वाच्चापरमिति न सह कार्यद्वयं स्यात्। न चैवं अनङ्गभूतोऽपि क्रमोपेक्षयैव स्वीक्रियते। न चाग्नेयद्वयस्य तन्त्रेणानुष्ठाने क्रमोपेक्षास्तीति न तथाभूतक्रमकः प्रयोगोऽपि शास्त्रार्थम्। सिद्धे च कार्ये न पुनः क्रमार्थमाग्नेयानुष्ठानं युक्तम्। अनिष्पन्न एव हि कार्ये प्रतीतक्रमेणानुष्ठानं न निष्पन्ने।

नन्वेवं सौम्यस्य मध्यस्थता हीयेत। न च तदा सौम्यस्याग्नेयात् कदाचिदपि पूर्वता कदाचित्परतेति क्रमविकल्पः। यतः स्वत एव क्रमविकल्पः। अत्र च मध्यस्थताख्य एक एव क्रमः।

उच्यते—एवं न्यायसिद्धे तन्त्रत्वे सौम्यस्याप्याग्नेयपरत्वमेव मुख्यत्वेनाग्नेयस्याभिमत्वात्। न चाग्नेयद्वयमध्यस्थतानुरोधायाग्नेयातन्त्रत्वम्।

राद्धान्तस्तु—विततपदार्थान्वितप्रतीत्यनुरोधादेव प्रयोगः कल्प्यते। तथाभूतप्रयोगार्थवत्त्वस्य च प्रयोगविधेरेव गमात् तन्त्रता। यथाग्नेयस्य पूर्वता प्रतीताऽपेक्षिता च सौम्यस्यापि मध्यस्थता तत्क्रमोप्यावश्यापेक्षः। अतः स्वक्रम एव प्रयुक्त्यनुगुणतयाऽऽदर्तव्यः। तन्त्रता तु न प्रतीताव(व?)श्यापेक्षितेति। समानप्रमाणगम्यं क्रमद्वयमेव ग्राह्यम्।

केचित्तु अतितन्त्रत्वे द्रव्यमपि तन्त्रम्। तदा वाक्यद्वयं सार्थकं न स्यात्। ऐन्द्रे तु दधिपयोरूपद्रव्यभेदायैव वाक्यद्वयं सार्थकम्। अतो यदि क्वचिदव्यवहित एकजातीयद्रव्यदेवतमपि वाक्यद्वयं स्यात्तदाप्यावृत्तिरित्याहुरिति।

इति प्रभाकरैकदेशीयमहामहोपाध्यायचन्द्रविरचितायां न्यायरत्नाकराख्य जैमिनि सूत्रव्याख्यायाम् एकादशाध्यायस्य प्रथमः पादः ॥

---

*भाष्ये शास्त्रदीपिकायाञ्चास्याधिकरणस्य "व्याख्यातं तुल्यानां यौगपद्यमगृह्यमाणविशेषाणा"मिति सूत्रं प्राधान्येन धृतमिति।

अथ द्वितीयः पादः ।

आग्नेयादीनां प्रधानानां तन्त्रताधिकरणम् ॥१॥

एकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात् ॥११।२।१॥

किं देशकालकर्तारो भेदेन तन्त्रं वा ? यदि कर्मदेशना शेषभूताः प्रयोज्याङ्गं तदा भेदेन प्राप्तस्य कार्यतोऽनुष्ठानतन्त्रताऽत्र चिन्त्या । देशादेस्तु प्राप्तेरेव तन्त्रमिति न साक्षात्सङ्गतिः किन्तु प्रयाजतन्त्रतोपोद्घातेन तथापि नास्य त·········पूर्वता किन्तु अनागतावेक्षणमेवावान्तरसङ्गतिनिबद्धचिन्ताभिस्तत्स्थानाक्रान्तेः ।

पूर्वपक्षस्तु—देशादेस्तु प्रतिप्रधानं भेदेनान्वयोऽङ्गत्वाद्द्रव्यदेवतादिवत्प्रयाजादिवच्च । न त्वेकैव पौर्णमासी प्रधानेषु परस्परसहितेष्वन्वेति सहितत्वेनाशास्त्रार्थत्वात् । यद्यपि सहितानामेव विषयतया शास्त्रार्थता तथाप्यङ्गसम्बन्धः साधन एव भवति करणता च भिद्यते । अतः प्रतिप्रधानं भेदेनान्वयः । साहित्यञ्चोद्देश्यविशेषणमविवक्षितम् । एवञ्च समे दर्शपूर्णमासाभ्यां यजेत । दर्शपूर्णमासयोर्युक्तयोश्चत्वार ऋत्विज इति सहितेऽन्वयं श्रुतत्वादिति निरस्तम् । तथा च समदेशत्वाधिष्ठानाभेदेऽपि कारकत्वभेदे क्रत्वन्तरवत्प्रयोगभेदः । तस्मान्न प्रधानेष्वन्योन्यसहितेष्वन्वयो·········दूरेऽङ्गसहितेषु तथा न गुणस्य देशादेर्गुणैरन्वयः समत्वादिति न साङ्गे प्रधानेऽन्वयः । तथा च यथाविनियोगं प्रयाजादेर्भेदेनैवानुष्ठानम् । एवं स्थिते किमङ्गेषु तदेव देशादि उतानियतमित्यवान्तरा चिन्ता । तत्र पूर्वपक्षेऽनियतदेशकालत्वं तयोरपि समदेशदर्शकालयोः स्वरूपतः सम्भवात् कर्तारस्तु ऋत्विजोऽन्य एव अलौकिकत्वादृत्विजां तेषामन्यत्र व्यापारस्य प्रमाणान्तरेणाज्ञानात् । आहवनीयवच्चान्योन्यनियमाच्चेति पुन राद्धान्तस्तु प्रयोगचोदनाशेषभूतं कालादिशास्त्रं विनियुङ्क्ते साङ्गे प्रधाने प्रयोग आक्षिप्यते । अतोऽधिकारविध्याक्षिप्ते प्रयोगेऽङ्गदेशनादयो न प्रयोज्याङ्गम् । न कर्मचोदनाशेषः । अतः साङ्गप्रधानप्रयोगे एकस्मिन्नेकोऽन्वयस्तद्द्वारा कर्माङ्गता । यद्वा प्रयोगावस्थायां साङ्गस्य प्रधानस्यैकशास्त्रार्थत्वात्तद्रूपे एकोन्वयो न पुनर्द्रव्यदेवतावत्प्रयोज्येऽन्वयः प्रयोग एव कदा केन कुत्रेति कालादेरपेक्षितत्वादपेक्षितविध्यनुरोधात् । न चाधिकारे विध्यन्विते सर्वत्र साङ्गे प्रधाने द्रव्यदेवताद्येकमन्वेतुमलं कर्मणामभेदप्रसङ्गेऽङ्गप्रधानत्वायोगात् साङ्गप्रधानतैव भज्येतेति कर्मस्वरूपविशेषकतया भेदेनैव सम्बन्धः । प्रयोज्येष्वेव च तयोरन्वयोऽपेक्षितः कालादिकन्तु न प्रयोज्यभेदकं

Scanned with OKEN Scanner

कालादिभेदेऽपि प्रयोज्यकर्मभेदात् देशादिभेदभिन्नेऽपि प्रयोगेन कर्मस्वरूपं भिद्यते। यतः तथा यागादिदेवतोद्देशपूर्वकद्रव्यत्यागात्मकं तस्य द्रव्यदेवते एव रूपं तत एव पदार्थभेदादित्यनेकप्रयोगानुगतस्यैकस्मिन्नेव प्रयोगे कर्मान्तरव्यावृत्तस्य कर्मस्वरूपविशेषस्य तत एव प्रतीतेः प्रयोज्य एव तेषामन्वयः।

विवेकस्तु—कर्मानेकप्रयोगसाधारणं तत्र न कुत्रेत्यपेक्षा। भेदके विशिष्टार्थापेक्षा न च देशादिभेदकं देशादिभिन्नप्रयोगेऽपि कर्मस्वरूपार्थवृत्तेरित्युक्तम्। प्रयोगस्तु कर्मणः प्रयुज्यमानावस्था शास्त्रार्थकर्मव्यक्तिसाध्यता न चैकस्यां व्यक्तावभेद्यायां देशादिभेदोऽन्वयार्ह इति तद्भेदात्प्रयोगभेदः।

नन्वेवं वैकल्पिकमपि व्रीहियवादिप्रयोगगतं प्रयोगभेदकम्। तत्कृतोर्देशादित्रयमेव प्रयोगभेदकमुच्यते इत्थं तथाप्यचिन्तितसिद्धैव प्रयाजाद्यावृत्तिः। अतोऽत्र प्रयाजाद्यावृत्तिचिन्तायां तत्सिद्धार्थतया देशादित्रयं भेदकमित्युक्तम्। तच्चिन्त्यम्। व्रीह्यादेः प्रयोज्याङ्गस्यैव सतः प्रयोगाङ्गत्वात् अत उक्तैव गतिः।

नन्वेवं कर्म निरूपकस्य प्रयाजादेरितिकर्तव्यतात्वेन प्रयोगविधिनैवापेक्षितत्वात् प्रयोगेऽन्वयः स्यात्। तदा च देशादितन्त्रतां विनैव प्रयाजादितन्त्रता स्यात्। मैवम्। न तावत् समुदायो नामान्यः करणम्। करणे चोपकारकतया प्रयोगविधेरितिकर्तव्यतापेक्षा प्रत्येकञ्च करणतेति प्रत्येकमेव प्रयाजाद्यन्वयः।

ननु च कालादेरपि करण एवान्वय इतिकर्तव्यतात्वात्। सत्यं, किन्तु प्रयोगमुखोऽसौ प्रयोगश्चैकम्। तत्रैक एवान्वय आद्य इति न विरोधः।

ननु कालादितन्त्रतयैव प्रयाजादितन्त्रतोक्तेति किम्पुनश्चिन्त्यते। यद्यपि प्रयोगे कालाद्यपेक्षा तथापि प्रयोज्यानामेव प्रयोगावस्थासम्भवात्। प्रतिप्रयोज्यमेवापेक्षास्तीति भेदेन सम्बन्धोसि······त्यधिकाशङ्कात्र निरस्यते सकलप्रयोगशेषतयैवावान्तरप्रयोगेष्वप्याकाङ्क्षानिवृत्तेर्न भेदेनाकाङ्क्षान्वयो वेति। एवञ्च प्रधानदेशकालकर्तृत्वमेवाङ्गानामित्यवान्तरचिन्ता राद्धान्तोऽपि सिद्धयति। एवञ्च मूलपूर्वपक्षापेक्षोऽवान्तरपूर्वपक्षः। मूलराद्धान्तापेक्षश्चावान्तरराद्धान्त इति।

विवरणे—प्रयोगेऽपेक्षितोऽपि देशादिः कारकत्वात् प्रतिक्रियमन्वेतीति द्रव्यादितुल्यतेति **पूर्वपक्षे राद्धान्तः**—यद्यपि वस्तुबलादेवं तथापि श्रुत्यनुरोधि वस्तुबलमिति देशादिविधौ करणावस्थेऽन्वयः श्रूयते। करणता च सेतिकर्तव्यताकस्यैवेति सेतिकर्तव्यताकस्यैको देशाद्यन्वयः। तदा चैकप्रयोगान्वयमुखी प्रतिक्रियं कारकता भवन्त्यपि न भेदेनान्वयमावहति। करणावस्था

तु क्वचित्तृतीयातः क्वचित्करणवाचिक्रतुपदादवगम्यते। तथा कालादिनियोगगृहीतं नियोगसाधनतामात्रेऽविशेषित एवान्वेति। साधनताविशेषविवक्षां विनाप्यन्वयसम्भवात्। तथा चाधिकारसाधनत्वेनान्वयान्नान्वयभेदः। द्रव्यादिकन्तु भिन्नकरणोत्पत्त्यपूर्वनिरूपितसाधनविशेषान्वितमिति न प्रयोगाङ्गम् ॥

राजसूयादावङ्गावृत्त्यधिकरणम् ॥३॥

इष्टिराजसूयचातुर्मास्येष्वैककर्म्यादङ्गानां तन्त्रभावः स्यात् ॥ ११।२।१२॥

एकस्मिन्नधिकारविधौ भिन्नकाले प्रधाने किमङ्गानि तन्त्रं न वा ?

ननूक्तं—विशिष्टप्रधानप्रयोगे एककालादिविधौ प्रधानकालीनमेवाङ्गमुपकारमिति कुतस्तन्त्रतेति कथं **पूर्वपक्षः**।

उच्यते—अधिकारविधिरेकमेव प्रयोगमाक्षिपति न च तन्त्रव्यवस्थोपदिष्टकालद्वयमविकल्पाद्वा समुच्चयाद्वाऽन्वेतुमलम्। अतो वरं प्रधानत्रयमात्रे पौर्णमास्यां पौर्णमास्या यजेतेति। तथा प्रधानत्रयमात्रे दर्शेऽमावास्यायाममावास्यया यजेतेति विधीयताम्। महाप्रयोगे ह्यन्वयादेवावान्तरप्रयोगेऽपेक्षाशान्तिसम्भवान्महाप्रयोगेऽन्वयः पूर्वमुक्तोऽसम्भवे तु प्रधानमात्रान्वय एव युक्तः। अङ्गानाञ्च प्रधानकालताप्यधिकारविधिकालीनतयैव न तु करणकालीनतयाऽङ्गानामित्यन्यतरकालीनमेवाङ्गं सर्वकरणोपकारकं यथा पशौ सायंप्रातराख्यप्रधानकालभेदेऽपि तन्त्रमङ्गानीति।

राद्धान्तस्तु—नाधिकारविध्यैकमात्रात्सति कालभेदे प्रधाने तन्त्रमङ्गानि करणेष्वङ्गमन्वेति तत्रैवेतिकर्तव्यतापेक्षा। यतः तत्सम्बन्धादेव च तेषां नियोगसाधनता न ग्राहकान्वयमात्रात् प्रयोगदेशनाशेषता च कालादेः सेतिकर्तव्यताकस्य च करणत्वात्। प्रयोग इति सेतिकर्तव्यताक एव कालादेरन्वयः। स च तदास्या यदि प्रयोगद्वयमेवाक्षिप्यते। न ह्यधिकारविधिकालीना यदङ्गं तत्तु यत्करणकालीनं (कालीन) करणोपकारकं तथा परमापूर्वसाधने हि कालसम्बन्धात्साङ्गप्रधानसम्बन्ध एवोचितः किन्तु व्यवस्थोपदिष्टकालद्वयस्य तथाऽसम्भवात्। यथासम्भवं प्रधानत्रयमात्रं हित्वा सम्बन्धः पशौ त्वेकः पशुयागः प्रयोज्यः। प्रधानमेकश्च प्रयोगः तत्र कल्पनञ्चाङ्गमुपकारकं सायंप्रातश्च तत्कालान्येवाङ्गान्युपकुर्वन्ति किन्तु प्रयोज्यकरणकालीनान्यतरकालीनमेवोपकारजनकमिति।

Scanned with OKEN Scanner

ननु च प्रचारद्वारेण पशोरपि प्रधानमेव भिन्नकालं जातमित्यङ्गावृत्तिर्न्याय्या। मैवम्। नाङ्गानि प्रचारद्वारेण विनियुज्यन्ते करणे किन्तु साक्षात्तस्य च करणैकत्वात् सकृदेवान्वय इति यागैकदेशता ह्यङ्गानां तदीयान्यतरकालीनतया सिद्धैव तस्मादत्र प्रयोगभेदः। एवञ्च देशादित्रयभेदोऽन्यतरस्यापि। इतरयोः स्वरूपतोऽभेदेऽपि कारकतया भेदमापयति।

विवरणे प्रयोगविधिगृहीतान्यङ्गानि स चैको देशादिभेदेपीति नाङ्गप्रयोगभेद इति **पूर्वपक्षः**।

राद्धान्तस्तु—करणावस्थे कालश्रुतिः। करणता च सेतिकर्तव्यताकस्य विशिष्टस्याग्रे ज्ञाता तत्रैवापेक्षितः काल इति भिन्नकालादिश्रुतेः प्रयोग एव भिन्न इति कल्प्यते। यत्रापि न करणादिनिर्देशो राजसूयादौ तत्र प्राकृतप्रयोगाङ्गकालकार्ये कालविधानात् प्रयोगाङ्गतेति ॥

आग्नावैष्णवाद्यङ्गानां भेदेनानुष्ठानाधिकरणम् ॥४॥

तथा स्यादध्वरकल्पेष्टौ विशेषस्यैककालत्वात् ॥११।२।१९॥

"आग्नावैष्णवं प्रातरष्टा कपालं निर्वपेत् सारस्वतश्चरुं बार्हस्पत्यश्चरुं आग्नावैष्णवमेकादशकपालं निर्वपेन्मध्यन्दिने सारस्वतश्चरुं बार्हस्पत्यश्चरुं आग्नावैष्णवं द्वादश कपालं निर्वपेदपराह्णे सारस्वतश्चरुं बार्हस्पत्यश्चरुं यस्य भ्रातृव्यः सोऽनेन यजेत अस्यामध्वरकल्पायामिष्टौ पुरा वाचः प्रवदतो नु निर्वपतीति वाक्येन निर्वापः प्रतिकृष्टः"। तत्र किं सर्वस्य निर्वापस्य प्रतिकर्षः उत प्रातःकालीनमात्रस्य?

पूर्वपक्षः—निर्वपतीति पदात् प्रकरणस्थनिर्वापधीः ग्रहपदादिव न प्रातःसवनिकग्रहमात्रधीः तदा च सर्वनिर्वापोद्देशेन प्रवचनपुराकालविधौ निर्वापापकर्षः तदा च तदन्तन्यायात्ततः प्राचामप्यपकर्षे प्रधानेभ्यो भिन्नकालस्य निर्वापान्तगुणकाण्डस्य तन्त्रता तथा निर्वापात्पराचामपि तन्त्रता न च तदापि न पराचामपि कालान्यत्वे मानम् येषामेवापकर्षस्तेषामेव भिन्नकालता सन्तु।

मैवम्। यदा निर्वापान्तस्य तन्त्रता तदा सर्वेषां सहोपक्रमात् यथोपक्रमं समाप्तिरुचिता। सहोपक्रान्तानाञ्च सहैव समाप्तिरपेक्षिता। सा च पराचां तन्त्रत्वे भवतीति तत्तन्त्रता। पराचामतन्त्रत्वे क्रमान्यत्वं स्यात्। निर्वापे हि तन्त्रे अन्याङ्गिनो निर्वापे कृते आद्यस्य प्रोक्षणादि स्यात्प्रोक्षणादेरपि पराचस्तन्त्रत्वे न विरोधः।

ननु सन्निपातिनो निर्वापप्रोक्षणादेः कथं तन्त्रता? मैवम्। एकदेवत्यपुरोडाशत्रये चरुद्वयत्रये चैकदेवत्ये निर्वापादेः सङ्कलितमुष्टिसङ्ख्यायास्तन्त्रता सन्तु येऽपकृष्टान्तः भूता आरादुपकारकास्ते तन्त्रमिति······

ननु प्रातःकालीनप्रवदनात्पूर्वं प्रातःकालीनयागापकर्षे प्रातःकालता साङ्गप्रधान उपदिष्टा न बाध्यते। सायङ्कालीननिर्वापापकर्षे च सा बाध्यत इति वरं निर्वापपदं सङ्कोच्यताम्। अतिदिष्टबाधायाप्युपदिष्टसङ्कोचाङ्गीकारात्। तथैवं क्वचिद्बाधसापेक्षो विधिरिति च स्याद्वैषम्यम्।

उच्यते। न सायङ्कालताङ्गे श्रुता किन्तु प्रधानकालतया न्यायलभ्यासामान्यविशेषयागे सिद्धे न सर्वनिर्वापापकर्षश्रुतिं सायं श्रुतिमपेक्ष्य विशेषविषयान्नान्यथयितुमलं किन्तु सायं श्रुतिरेव निर्वापेतराङ्गे संकोच्या।

राद्धान्तस्तु सायमादिकालो हि प्राकृतसाङ्गप्रधानकालकार्ये विधेयः। तदा च प्रातःकालस्यैव निर्वापस्य······वदनपुराकालक्रमो युक्तः। यस्यैव च प्रातःकालत्वं तस्यैव किं प्राकृतक्रमेणानुष्ठानमन्यथा वेति सन्देहे तत्रैव क्रमाख्यकालविधिर्युक्तः। न चावान्तरप्रयोगान्तरीयनिर्वापस्य प्रयोगान्तरीयाङ्गे न क्रमो न्याय्यः तुल्यकालीनतयापि स एव निर्वापोधीस्थ इति ॥

वसाहोमे भेदेनानुष्ठानाधिकरणम् ॥५॥

वसाहोमस्तन्त्रमेकदेवतेषु स्यात् प्रदानस्यैककालत्वात् ॥११।२।२४॥

एककालैकदेवत्यप्राजापत्यपशुषु याज्यार्द्धर्चान्ते वसां जुहोतीति चोदकागतो वसाहोमस्तन्त्रम्। एकयाज्यार्द्धर्चान्त एव वसाहोमोस्तु न तु वसास्थिभिः प्रयोज्येति देवतेज्ये याज्यार्द्धर्चान्तस्याप्यैक्यानिमित्ताना·········न्तेनैमित्तिकानावृत्तिः भिन्नदेवत्येषु निमित्तानावृत्तेस्तदावृत्तिरिति तन्त्रावापविषयप्रदर्शने मात्रमित्रम्। अत्र च भिन्नदेवत्येषु विवेकेन पूर्वपक्षलव······ सम्बन्धिशब्दतया याज्यापदं तत्तद्यागसम्बन्धियाज्यापरं प्रकृतौ च तादृशत्वमिति तत्तूक्तम्। अत्रत्यकुम्भ्यधिकरणगतार्थत्वात् ॥

यूपाहुतौ तन्त्राधिकरणम् ॥६॥

अन्ते यूपाहुतिस्तद्वत् ॥२६॥

सोमे यूपैकादशिन्यां वशापशुधर्मो यूपाहुतिस्तन्त्रं न वा (इति!) **पूर्वपक्षः**। यद्यपि मथितस्याग्नेर्देशस्याभेदाद्यूपाहुतेस्तन्त्रत्वं युक्तं तथापि प्रकृतिपशौ वैश्वोप्याज्यञ्च बलिञ्चादाय यूपस्यान्तिकेऽग्निं मथित्वा यूपाहुतीर्जुहोतीति श्रुतौ याज्यार्द्धर्चान्तनयात् स्वयूपान्तिकत्वीरतो यूपभेदेऽन्तिकदेशभेदादावृत्तिः। न चान्तिकार्थोऽनङ्गमविधेयः प्राग्वंशे कर्मप्रवृत्तावप्राप्तेः पक्षप्राप्ता-

वपि अप्राप्तत्वाद्विवक्षैव युक्ता । अतो होमेऽन्तिकविधिः मथने वा यूपान्तिकेऽग्निमथनं यदि होमेऽपि तत्रैव स्यादिति होमप्यन्तिकम् ।

राद्धान्तस्तु—नान्तिकस्य मथने मथनस्य च होमे विधिर्वैरूप्यात् । न चोभयविशिष्टविधिर्गौरवात् असम्भवाच्च । होमे हि मथनस्य साधनत्वेनैव एवमन्वयः । तदा च साधनरूपे कारकीभूतान्तिकानन्वयः । कार्ये तु कारकव्यापाररूपे कारकस्य सोमस्यारुणादेश्चान्वयादेकवाक्यता युक्तैव । अतोऽन्तिकानुवादः प्राप्तत्वात् । तथा हि यूपाहुतिर्यूपार्था यूपविशेषमुद्दिश्य कार्या यूपविशेषस्य बुद्धिष्ठ(स्थ ?)ता प्रत्यक्षरूपैव युक्ता सुकरत्वाद्विशेषप्रतीतेः स्फुटत्वान्नैरपेक्ष्याच्चेति न स्मृत्याधीष्ठता । अतो यत्र प्रत्यक्षा यूपास्तत्र होम इति देशाभेदात्तन्त्रता । अत एव न विशिष्टमथने विधिगौरवात् असम्भवात्प्राप्तेश्च प्राग्वंशे हि मथितमग्निं गृहीत्वा यूपान्वेषणं दुष्करम् । अतो यूपान्तिक एव मथनमौचित्यात् प्राप्तं तथाविधौ श्रुतिस्वरसाधनपेक्षात्यन्तान्तिकधीः तद्विधाने च यूपदारुः स्यात् । अनुवादः प्राप्त्यपेक्षोऽतोऽसौ योग्यतया देवयजनं दूरमपेक्ष्य प्राप्तानूद्यते । यत्रान्तिकदेशे सर्वे यूपा दृश्यन्ते इत्यविरोधः ॥

साङ्गस्यावभृथस्याप्स्वनुष्ठानाधिकरणम् ॥७॥

अवभृथे प्रधानेऽग्निविकारः स्यान्नहि तद्धेतुरग्निसंयोगः ॥११।२।२९॥

मे मे वारुणेनैककपाले नावभृथमभ्यवयन्तीति श्रुतम् । तत्रावभृथेनेति तृतीयातः करणत्वावगतेः सेति कर्तव्यताकस्य च करणत्वात्साङ्गप्रधान एवापाम्विधानमिति कथं पूर्वपक्षः ।

उच्यते च वने गतौ नावभृथो यागः करणं न वा पूर्वं गतिद्वारा । न च दर्शपूर्णमासाभ्यां यजेतेतिवन्नियोगसिद्धौ करणत्वम् । अवभृथस्य चरणनामत्वाभावत्वात् । चरणस्य चाविषयत्वात् । अतदार्थस्तु तत्तृतीयेयम् । अवभृथलक्षिते चरणेऽनुष्ठानरूपेऽपाम्विधिः ।

नत्वेवं स्वानुपूर्वानुष्ठानेऽवभृथस्य करणत्वसम्भवात् करणतृतीयैवास्तु । मैवम् । अपूर्वकृतौ हि करणता न तु तत्साधनानुष्ठानरूपे सम्भविनी ।

नन्वेवमप्यवभृथचरणे प्रयोगरूपेऽपाम्विधौ साङ्गप्रधानप्रयोगार्थतैव स्यात् । मैवम् । प्रधानमात्रे ह्यङ्गविधेरौत्सत्तिकः आनर्थक्यात्तदङ्गेष्वित्युक्तम् । गन्तृबलादेवाङ्गप्रधानार्थता । अत्र तु प्रधानेऽपि शब्दाविरोधः । प्रयोगशेषत्वे चापां देशकार्ये प्राकृते विधिः स्यादाहवनीयकार्ये, अग्नेः समादिवत्प्रकृतौ प्रयोगानाधारत्वादिति ।

Scanned with OKEN Scanner

राद्धान्तस्तु चरणशब्दात्साङ्गप्रयोगप्रतीतेः संकोचे हेत्वभावात्। अङ्गसम्बन्धेऽपि प्रधानसम्बन्धाहानात् साङ्गप्रधानार्थतैवोचिता।

न च प्रयोगाङ्गत्वेऽपि देशकार्ये विधिः। देशकार्याक्षमत्वात् प्राकृतस्य देशस्य समादेर्देशान्तरानपेक्षं धारणकार्यम्। न च तदपां शक्यं येन हि तत्कार्ये कृते पुनर्न तदपेक्षा तत्तस्य कार्ये विधेयं यथा शरावर्हिःकार्ये। न चेह तथेति साङ्गप्रधाने आहवनीयस्यैव निवृत्तिः ॥

विवरणे—अथ प्राप्तचरणके पूर्वे करणतृतीयैवेयमिति साङ्गप्रधाने आपः ॥

नवमे वरुणप्रघासेषु आग्नेयादीनां मारुत्या भेदेनानुष्ठानाधिकरणम् ॥८॥

प्रयोगचोदनेति चेत् ॥११।२।३६॥

वरुणप्रघासे विहारपृथक्त्वमाम्नातं पृथगग्नी प्रणयेत। तत्राध्वर्युरुत्तरे विहारे हवींष्यासादयति मारुतीमेव प्रतिपस्थाता दक्षिणस्मिन्निति।

तत्र किमुत्तरविहार एवाष्टानां प्रधानहविषां मारुत्याश्च प्रधानस्यानुष्ठानमतो देशाभेदात्तन्त्रमङ्गानि उत दक्षिणविहारे मारुत्यनुष्ठाने देशभेदादङ्गावृत्तिः।

अत्र च यद्यपि विहारभेदेऽप्यलौकिक आहवनीय एक एवेति न देशभेदः तथाप्याहवनीयभेदोऽस्तीति कृत्वा चिन्ता इति **पूर्वपक्षः**।

मिलिताङ्गप्रधानद्वारको ह्याहवनीयस्यापूर्वान्वयोऽत एकाहवनीयसाध्यतासाङ्गप्रधानहोमानामबाध्येति होमानां प्राकृताध्वर्युः कत्वाय बहुहविरासादनस्य दृष्टान्तत्वायोत्तरविहार एव सर्वे होमाः। मारुत्यासादनमदृष्टान्तं दक्षिणविहारेऽस्त्विति।

राद्धान्तस्तु निरपेक्षानेकहोमश्रुतौ तद्द्वारा नियोगान्वयो भेदेनाहवनीयस्यातो भेदेन विनियोगः। प्रत्युद्देश्यं वाक्यपरिसमाप्तिन्यायादपि होमानां प्रत्येकमेवाहवनीयसाध्यता न समुत्थितानाम्। प्रकृतौ चैकत्र वाहवनीय इत्यर्थादेकत्र सर्वे होमाः।

अत्र त्वग्निभेदे अग्नेश्च होमार्थत्वादन्योन्यनियमात् होमार्थमेवाग्निपृथक्त्वमिति सिद्धे तत्सिद्धयेऽव्यवस्थया होमप्राप्तौ व्यवस्थितिविधेरासादनदृष्टान्तत्वाय च व्यवस्थापनमेव युक्तं वाक्यद्वयम्।

किञ्चानुषक्ति(क)मासादयति पदमुत्तरे होमानुप्राप्तावनुवादकं दृष्टान्तम्। दक्षिणे च विधायकमदृष्टान्तञ्चेत्ययुक्तम्।

एवञ्च होमदेशभेदाद्भेदेनाङ्गानीति कृत्वा चिन्तोद्घाटनम् आहवनीयभेदो नेति ॥

उत्तरदक्षिणविहारयोः कर्तृभेदाधिकरणम् ॥६॥

कर्तृभेदस्तथेति च ॥११।२।४२॥

तत्रैव चिन्ता किं कर्ता तन्त्रं न वा ? तत्रैष विषयवरुणप्रघासे विहारौ द्वौ चातुर्मास्यानां यज्ञक्रतूनां पञ्च ऋत्विज इति वचनाद्वरुणप्रघासे पञ्च ऋत्विजः ।

अध्वर्युरग्नीध्रो होता ब्रह्मा प्रतिप्रस्थाता अध्वर्यादिचतुष्टयं देशैकप्राप्तमधिकोऽत्र प्रतिप्रस्थातेति । तस्य च कार्यं मारुतीप्रकृतिनयादध्वर्युर्यागं करोति ।

अत्राप्युत्तरे विहारे यजति इदानीमग्नीध्रहोतृब्रह्मसु सन्देहः किं विहारभेदे तेषां भेदो न वा ? तत्र देशभेदात्प्रयोगभेदे कर्तृकालयोरपि भेदः । अधिष्ठानतश्चैक्यस्य सम्भवे कारकतया भेदोऽसम्भवे त्वधिष्ठानतोऽपि भेदः । एकेनापि प्रयोगभेदे...ऽन्ययोर्न प्रयोगाभेदकता ।

अत्र च काल एक एव प्रयोगद्वयेऽन्वयार्हः कारकतयेति तन्त्रम् । कर्तारस्तु न तथा । तथा हि होता आहवनीयप्रत्यग्देशस्थितो याज्यानुवाक्योपाधेन (वाक्यावचनेन ?) सम्बोधयति तथाग्नेरुत्तरतः स्थितोऽग्नीध्रः आश्रावणं करोति । ब्रह्मापि दक्षिणतः स्थितः प्रत्यवेक्षते कृताकृतम् ।

अत्र द्विदेशस्ते आहवनीये तत्प्रत्यग्देशभेदे यत्राग्नौ यो होमः तदग्निप्रत्यकस्तश्चासौ(?) तत्र होमे उपकरोति याज्याद्यर्चान्तनयात् ।

एकदा चाग्निद्वये होमाजन्यत्वाद्धोतृभेदः । एवं ब्रह्माग्नीध्रयोरपीति **पूर्वपक्षः** । यथा च प्रयोगभेदादङ्गाङ्गभेदः तथा कर्तृभेद इत्युक्तम् । न त्वङ्गभेदः कर्तृभेदहेतुरुक्तः असम्भवात् । कर्तृभेदाप्यङ्गभेदो न तु वैपरीत्यं यतः ।

राद्धान्तस्तु—प्रकृतौ गार्हपत्यात्प्रागावहनीयात्प्रत्यक्षे होतुः अत्रापि गार्हपत्यस्यैक्यादैक्ये गार्हपत्यलक्षितः प्राग्देशः । आहवनीयलक्षितस्त्वाहवनीयभेदेऽप्राकृतेऽप्राप्तत्वादेव नादरणीयः । तथैकस्य प्राकृतस्य विहारस्य कार्ये विहारद्वयस्य निपतितत्वादुभयापेक्षमेव दक्षिणोत्तरं नैकापेक्षितमिति न कर्तृभेदः ।

न च कर्त्राधारभूतदेशभेदात्प्रधानस्य कर्तृभेदो युक्तः । अतिदेशशास्त्रमपि चैकेन देशकेन सम्पन्नमिति । एकदेशस्थ एव कर्तृसम्बोधनकारी न तु कर्तृभेदः ।

नन्वन्तर्वेदि अन्यः पादो होतुर्बहिर्वेदि अन्य इति श्रुतेः एकस्य होतुः पादो नोभयत्रोपकर्तुमलमिति कर्तृभेदो युक्तः ।

मैवम्, न हीतुः पादेन वेदिः संस्क्रियते येन तदर्थं कर्तृभेदः स्यात्किन्तु बहिरन्तर्लक्षितो देशकर्तुरिति न कर्तृभेदः । लिङ्गञ्च प्रवयसं ऋषभं दक्षिणां ददातीति दाक्षिण्यैक्यमेककर्तृत्वे ।

यत्तु 'पञ्चर्त्विज' इतिश्रुतेः कर्तृभेद इति राद्धान्ताभासः प्रयोगभेदे प्रतिप्रयोगं पञ्चत्वात्, यथा प्रयोगभेदेऽपि प्रयाजादीनां न च प्रयाजा(दी ?)निति ॥

उत्तरदक्षिणविहारयोः आपराग्निकहोमानां भेदेन अनुष्ठानाधिकरणम् ॥१०॥

एकाग्नित्वादपरेषु तन्त्रं स्यात् ॥११।२।४७॥

तत्रैव चिन्ता किं गार्हपत्ये क्रियमाणाङ्गभूता होमास्तन्त्रं न वा ?

ननु यद्यपि देशभेदाभावान्नापराग्निकानां होमानां भेदस्तथाध्वर्युकर्तृकास्ते अष्टानामुपकारकाः प्रतिप्रस्थातृकर्तृकाश्च मारुत्या इति कर्तृभेदो देवभेदेऽस्त्विति कथं **पूर्वपक्षः** ।

अत्रोच्यते—होमान्वाहवनीयभेदेऽव्यवस्थया यागप्राप्तौ नियमवन्मन्त्रव······स्थितेनाध्वर्युणोभयत्र कर्माशक्तेर्दक्षिणवैहारिककर्तृभेदतः कः कर्तेत्यपेक्षायां प्रतिपस्थातृनियमो दक्षिणवैहारिक एवेति अन्यत्रोत्सङ्गसिद्धोऽध्वर्यु रेव कर्तेति कर्त्रभेदादपराग्निकानां तन्त्रतेति ।

तन्न । एवं देशविधिसापेक्षः कर्तृविधिः स्यात् सापेक्षिता चायुक्ता । तथा यदि वाक्यान्तरान्मारुत्यां देशान्तरं विहितं स्यात्तदा कर्तृभेदप्राप्तौ मारुतीमेवेति वाक्यं प्रतिप्रस्थातृनियामकं स्यान्न चैकमेव वाक्यं मारुत्यां देशं विधाय प्राप्तकर्तृभेदपूर्वकतत्कर्तृनियमं विधायालम् । अत एकदैव कर्तृदेशविधिरिति नास्ति **पूर्वपक्षः** ।

उच्यते—अपेक्षितविधेर्लाघवाच्च देशभेदविधिसापेक्षतास्तु गुणविधिवाक्यानामिव यत्रैवांशे प्रतिप्रस्थातृविधिस्तन्मात्र एव नाध्वर्युवद्यत्र तु चोदकप्राप्त एवासौ अतोऽष्टाविति वाक्यमष्टहविस्तूत्तरवेदिमात्रं विधत्ते । अध्वर्युरित्यनूद्यते । अन्यथा वाक्यं भिद्यते ।

एवञ्च पारिशेष्यान्मारुत्यां दक्षिणविहारप्राप्तौ तत्र चावश्यके कर्तृभेदे प्रतिप्रस्थातृनियमः त्वन्मत एव यावत्कर्तृदेशयोर्विधौ वाक्यं भिद्यते ।

राद्धान्तस्तु—एवमष्टाविति वाक्यापेक्षं मारुतीवाक्यं स्यात् । न चाध्वर्युनियमविधिं विना कर्तृभेदोऽपि प्राप्यते । तथा एकमासादयतिपदं एकदा वाक्यार्थद्वयान्वयि न स्यात् । ततश्च वाक्यद्वयेन प्राकृतासादनकार्ये आसादनद्वयं प्रयोगद्वयं वा विधीयते । अतः कर्तृभेदादङ्गभेदः ।

ननु यदि देशभेदनापेक्ष एव कर्तृभेदस्तदा कर्तृभेदादेव तन्त्रभेदसिद्धेः पूर्वाधिकरणे किं तदर्थं देशभेदोपन्यासेन ?

सत्यम् । किन्तु कर्तृभेदादपि तन्त्रभेदादपि तन्त्रभेदप्रदर्शनार्थमिदम् । असन्तं कर्तृभेदं

Scanned with OKEN Scanner

कृत्वा पूर्वाधिकरणम् । यदि क्वापि दक्षिणे विहारे प्रतिप्रस्थातारं प्रत्याम्नायाध्वर्युरेव विधीयते तथापि देशभेदात्तन्त्रभेद इति दर्शि(र्शयि ?)तुम् ।

वाजपेये ब्रह्मसाम्न्यालम्भस्य कर्मशेषप्रतिषेधार्थताधिकरणम् ॥११॥

पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत्तस्माद्ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात् ॥११।२।५०॥

·· तानाद्यमेके (?) प्राजापत्यानां क···र्क(?) ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात् । वाजपेये प्राजापत्यान्पशून् प्रकृत्य श्रूयते 'तान् पर्यग्निकृतानुत्सृजन्ति' त्यजन्ति तद्विषयव्यापारं न कुर्वन्ति इत्यर्थः । 'ब्रह्मसाम्नि आलभत' इति ।

तत्र संशयः, किं पर्यग्निकरणान्तं गुणकाण्डं कृत्वा जीवद्भिरेव यागः कर्तव्यः । पर्यग्निकरणोत्तरकालीनालम्भावदानाद्यतिदेशप्राप्तं सर्वथा न कर्तव्यमेव ब्रह्मसाम्नि आलभत इति कर्मान्तरचोदना ।

अथवा पर्यग्निकरणात् परभूत आलम्भो ब्रह्मसाम्नि आलभते इत्यनेन ब्रह्मसाम्निकाल उत्कृष्यते तदा चालम्भात्पूर्वभूतपर्यग्निकरणान्तं गुणकाण्डं स्वकाले कृत्वार्थात्कर्मोपरतिः प्राप्तानूद्यते ।

तथा च पर्यग्निकृतान् ब्रह्मसाम्न्यालभत इत्येकं वाक्यम् । तत्र संस्काराणामालम्भादीनां बाधो जीवद्भिरेव याग इति **पूर्वपक्षः** ।

यथा कपिञ्जले पर्यग्निकरणान्तं गुणकाण्डं कृत्वा आलम्भाद्यकृत्वैव यागः, पर्यग्निकृतानावश्यानुत्सृजन्तीति श्रुतिबलात् तथात्रापि तया श्रुत्याऽविशेषात्तयैव यागः, न तु कर्मोपरतिमात्रम्, उत्सर्गशब्दात्स्वार्थत्याग एव शीघ्रं यागधीः । तदा च पश्चाद्भाविनि ब्रह्मसाम्नि आलभत इत्यालम्भकर्मापेक्षायां सन्निधानात्प्राजापत्यपशव एव सम्बध्यन्ते । ततश्च पश्वन्तरद्रव्यकं कर्मान्तरमेवेति ।

राद्धान्तस्तु—एकवाक्यत्वे चाबाधे च सम्भवति न वाक्यभेदबाधे युक्ते । आरण्ये तु विधेयान्तराभावात्तथास्तु । अनुषङ्गोऽपि न कल्प्यः । कल्पनायामपि प्रत्यभिज्ञानात्तदेव प्राजापत्यं कर्म ब्रह्मसाम्नि स्यान्न कर्मान्तरम् । ततश्चारण्यश्रुतिसाम्यमात्रेण भेदाग्रहात्पूर्वपक्षो मन्द इति ॥

अहीने उद्गाणामुत्सर्गस्य कर्मशेषप्रतिषेधार्थताधिकरणम् ॥१२॥

पञ्चशारदीयास्तथेति चेत् ॥११।२।५२॥

अस्ति पञ्चशारदीयोऽहीनः मारुत्यां पञ्चशारदीयो यः कामयेत प्रजया बहु स्यामिति स एतेन यजेतेति। एते मरुद्देवताऽव्यक्तदेशनालिङ्गं प्राप्तसोमद्रव्यकाः प्रधानयागाः। एवञ्च तत्र श्रूयते वैशाख्याममावास्यायां सप्तदश मारुतीस्त्रिवत्सराः प्रवीता उपाकरोति। तत्र ते सप्तदश यागास्त्रिवत्सराः प्रसुतस्त्रीपशुद्रव्यकाः 'सप्तदश च पृश्नीनुक्ष्णा' इत्यत्रापि सन्निहितमारुतोऽध्याहारः।

अर्थ(ानु)षङ्गमिति **केचित्**। पृश्नी·········तनौ। एतेऽपि सप्तदश मारुताः 'तान्पर्यग्निकृतान्प्रोक्षितान् इतरांश्च आलभन्ते प्रेतरानुत्सृजन्ति'। ततः सम्वत्सरे राजीवानानयन्ति·············'तान्पर्यग्निकृतानितरान् आलभन्ते प्रेतरानुत्सृजन्ति। राजीवा मृगभेदाः। सुत्यासु च श्रुतं त्रीन् त्रीन् वस्तु एकैकस्मिन्नहनि आलभेरन् पञ्च चोत्तम' इति।

अत्र विषयशुद्धिरुक्ता विशाखानक्षत्रयोगे नी···'कार्तिकसम्भवास्वमावास्यासु पञ्चभिर्वर्षैः पञ्च सुत्या भवन्ति। सुत्या च प्रधानमङ्गं वैशाख्यमावास्या श्रुतेरङ्गप्रधानयोः साहित्यार्थं प्रधानेऽपि सैवामावास्येति।

ननु यत्र मासे मेषे सूर्यः तत्र वैशाखो रूढः। अतस्तन्मासीयैव वैशाखी ग्राह्या। तस्याश्चावश्यकत्वात्। विध्यपेक्षितप्रयोगाविच्छेदश्च स्यात्। न तु वैशाखीपौर्णमासीयोगाद्वैशाखो येन शीघ्रं विशाखा नक्षत्रयुक्तैवामावास्या प्रतीयेत। असत्यपि योगे वैशाखपदप्रयोगात्। सत्यपि च नक्षत्रयोगे तिथ्यन्तरे वैशाखपदादिपदाप्रयोगात्। '·नक्षत्रेण युक्तः कालः' 'सास्मिन्पौर्णमासीति संज्ञायामि'ति सूत्रद्वयैकवाक्यतया नक्षत्रयुक्तापि पौर्णमास्येव वाच्या न तिथ्यन्तरम्।

तत्राहुः—नक्षत्रयुक्तपौर्णमासीयोगादेव मासे तत्तदाख्या। अत एव स्मृतिषु तद्ग्रहः। युक्तं भेदं क्लृप्तयः(?) सम्भवे रूढिकल्पनस्यान्याय्यत्वात्।

मेषस्थे रवौ तु प्रायिकतया तत्पदं वैशाखीव न वैशाखमासीया। कालाट्ठञिति प्रसक्तौ वैशाखिकीति रूपा(पमा ?)पत्ते।

अथवापि मासवर्षसम्बन्धे भवति पौषी रात्रिरितिवत्तर्हि नक्षत्रयोगमात्रेण तिथ्यन्तरेऽपि तत्पदमिति क्रमः। नक्षत्रेण युक्तः काल इत्यविशेषेणोक्तेः। अत एव नक्षत्रेण युक्तः काल इत्यत्र पौषी रात्रिः पौषमहः इत्युदाहृतम्।

सास्मिन् पौर्णमासीति च मासि प्रयोगार्थम्। कथं तर्हि रोहिण्यां यत्र पौर्णमासी स कार्तिकः। तत्कार्य क......येत्यदोषः।

यद्वा सामान्यविहितः चातुर्थिकोऽयमगत्याया सास्मिन् पौर्णमासीति अतिशीघ्रं पौर्णमासीबोधार्थतया विशेषा...गामभव्यर्थम्। तदा ह्यधिकारवाक्येऽपि शरत्कुन्दादयच्छी: विचा...बुद्धेरभावात्।

ऋतुस्तु सूर्यगत्या मासद्वये नियतः। तथामावास्यासाध्यस्य दिनमास-ऋत्वयनद्वारा सम्बन्धो बोध्यत इत्यव्यवहितर्तुपरतैव। सर्वमेव पदस्येवाहःपरता। त्रिवृतासवनसम्बन्धिना सह सम्बन्धात्।

न च शरदि विशाखानक्षत्रयुक्तामावास्या सम्भवः कार्तिके सम्भवात्। आश्विन-कार्तिकयोरन्यतरस्मिन्नवश्यं वैशाख्यमावास्यायुतः(?)। एवञ्च पञ्चभिरेव वर्षैरर्थाच्चत्समाप्ते ततः सम्वत्सरे पूर्ण इत्युपपन्नम्।

अन्ये त्वाहुः—कृत्तिकारोहिणीभ्यामन्यतरेण यत्र पौर्णमासी स कार्तिकः।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः।

शेषा मासा त्रिभा ज्ञेया कार्तिकादिव्यवस्थया॥

इति **स्मृतेः**। स च कार्तिको मासः आदिभूतः पूर्णिमान्तः। पूर्णिमान्ते च तत्रावश्यममावास्या वैशाखी। कथं पुनरेतत्? भवृद्धितिथिक्षयादिति चेत्। तन्न। **अष्ट द्वौ(?)** तिथिक्षयस्य ज्योतिश्शास्त्रविरुद्धत्वात्।

यच्च पक्षद्वयेन सप्तविंशतिनक्षत्राणि रविणा भुज्यन्ते तत्र यदि विशाखानक्षत्र-युक्तामावास्या तदा सूर्यचन्द्रमसोर्विशाखायामेव सत्त्वं तदा पक्षैके सार्धत्रयोदशनक्षत्रभोगात् कृत्तिकया पौर्णमासी अन्यैव भवतीति।

तत्तुच्छम्। तथा ग्रन्थे पूर्णिमान्तकार्तिकसम्भवास्त्विति नोक्तम्। पूर्णिमान्तत्वं मासस्य ज्योतिश्शास्त्रविरुद्धं किन्तु चैत्रशुक्लप्रतिपदादिक एवायं समासमूहः। कश्चिन्मा-सस्त्रिंशद्दिनैः कश्चित्तष्ट्या दर्शान्ते च कार्तिके आश्विन एव वैशाख्यमावास्या भवतीति तस्मादुक्तैव रीतिः।

सन्देहश्चेत्थं किमाद्येऽब्दे मारुतीनामुक्ष्णाञ्च पर्यग्निकरणान्तं गुणकाण्डं हुत्वा मारुती-नामालम्भावदानादि कृत्वा यागः कर्त्तव्यः। उक्ष्णां त्वालम्भोत्कर्षात्तत्काले पर्य्यग्निकरणान्तं गुणकाण्डं कृत्वा कर्तुपरतिः। प्राप्ताप्राप्तेतरानुत्सृजन्तीत्यनूद्यते त्रीन्त्रीनुक्ष्ण एकैकस्मिन्न-हन्यालभेरन्। पञ्च चोत्तम इत्यनेन चतुर्षु वर्षेषु चतसृषु सुत्यासु त्रयाणां त्रयाणामालम्भ उत्कृष्यते। पञ्चमे वर्षे सुत्यायां पञ्चानामुक्ष्णामालम्भोत्कर्षः। ततश्चाद्येऽब्दे सप्तदश मारुतीयागाः। सप्तदशानां चोक्ष्णां मध्ये सुत्यायामुक्षत्रयस्यालम्भावदानादि कृत्वा त्रयो यागाः शिष्टाश्चतुर्दशोक्षयागोऽकृतालम्भादिका वर्ण्यन्ते...रे यागार्थे कर्त्रा धार्यन्ते।

द्वितीये त्वब्दे राजीवानाञ्च पर्यग्निकरणं तत्प्रोक्षणञ्च कृत्वा राजीवानामालम्भादि कृत्वा अभीक्ष्णं सप्तदश यागाः सुत्यानाञ्च उक्षत्रयालम्भावदानादि कृत्वा ततः सुत्यायां त्रयो यागा अवशिष्टा एकादशोक्षाणः स्थाप्यन्ते।

Scanned with OKEN Scanner

तृतीये त्वब्दे त्रयाणां सुत्यायामालम्भादि कृत्वा त्रयो यागाः। एवञ्चतुर्थेऽपि सुत्यायां त्रयाणामालम्भादि कृत्वा त्रयो यागाः।

पञ्चमेऽप्यब्दे सुत्यायां पञ्चानामालम्भादि कृत्वा पञ्च यागाः। एवं वर्षत्रये पुनः पुनः पर्यग्निकरणादिः। सोऽयं प्राजापत्यसाम्यात्पूर्वपक्षः, उताद्येऽब्दे गुणकाण्डं कृत्वा आलम्भादिभिर्मारुतीभिः सप्तदश यागाः।

अलब्धैश्चोक्षभिः सप्तदश यागाः सुत्यायाञ्चापरेणोक्षत्रयेणालम्भादिसंस्क्रियते नापरं यागत्रयम्।

एवं द्वितीयेऽप्यब्दे राजीवेषु सप्तदशसु चोक्षान्तरेषु च पर्यग्निकरणान्तं गुणकाण्डं कृत्वा आलब्धैराजीवैः सप्तदश यागाः। अलब्धैश्चोक्षभिः सुत्यायाञ्च परेणोक्षत्रयेणालम्भादि संस्क्रियते नापरं यागत्रयम्।

तृतीये त्वब्दे सुत्यायामालम्भादि संस्क्रियते नोक्षत्रयेण यागत्रयम्। एवं चतुर्थे पञ्चमे तु पञ्चभिरुक्षभिः पञ्च यागाः। ततश्च त्रीन् त्रीनुक्ष्ण एकैकस्मिन्नहन्यालमेरन्। पञ्च चोत्तम इति यागान्तरं न तु सर्वेषामुक्ष्णामालम्भोत्कर्षः प्रेतरानुत्सृजन्तीति **आरण्यन्यायः**।

सोऽयं **राद्धान्त** :—तदेवं सन्देहे **पूर्वपक्षः** यथैकवाक्यताप्रतीतेः प्राजापत्यानां ब्रह्म·········म्यालम्भोत्कर्षात्पूर्वं पर्यग्निकरणान्तता प्राप्तानूद्यते तथात्रापि सप्तदशानामुक्ष्णां त्रीन् त्रीनुक्ष्ण इति सुत्यास्वालम्भोत्कर्षात्पूर्वं प्राप्तं पर्यग्निकरणान्तत्वमनूद्यत इति············ वोक्षकर्मण एव ते सप्तदशोक्षाणः।

राद्धान्तस्तु—सप्तदश च पृश्नीनुक्ष्ण इत्यत्र क्रियाकारकाकाङ्क्षायां मारुतानुपकरोतीत्यनुषङ्गो न तु सप्तदश पृश्नीनुक्ष्णः। त्रीन् त्रीनुक्ष्ण एकैकस्मिन्नहन्यालमेरन्। पञ्च चोत्तम इति सम्बन्धोऽवकल्प्यते येनैकवाक्यता प्रतीयेत।

यदि सप्तदशोक्ष्णां मध्ये त्रीन् त्रीनुक्ष्ण इति स्यात्, स्यादन्वयो······नेह, तथा त्रीन् त्रीनित्यत्रैव सप्तदशोक्ष्णां मरुद्देवतानां विधिसिद्धेः। सप्तदशोक्ष्ण इति व्यस्तम्।

नन्वस्तूपकरोत्यनुषङ्गात्सप्तदशवाक्ये यागविधिः मारुतीपदस्यापि तत्रात्यन्तावन्निधित्वात् तथापि तान्पर्यग्निकृतान् प्रोक्षितानुत्सृजन्ति त्रीन् त्रीनुक्ष्ण इत्येकवाक्यतास्तु।

मैवम्, तेषां पर्यग्निकृतानां मध्ये त्रीन् त्रीनित्यश्रवणान्नान्वयः। नहि सप्तदशोत्सृजन्ति त्रीन् त्रीनेकैकस्मिन्नालमेत इत्येकोऽन्वयः। तथा आलम्भोद्देशेन सुत्याख्यकालविधानात्, अन्यस्य प्राप्ततयैकवाक्यता वाच्या, न सा सम्भवति, त्रीन् त्रीनुक्ष्ण इत्युद्देशविशेषस्य विवक्षायोगात्।

Scanned with OKEN Scanner

अतोऽविशेषात् त्रीन्त्रीनित्यत्रापि मारुतार्थानुषङ्गात्कर्मान्तराणीति चतुस्त्रिंशदेते यागाः। पृथक्त्वे तु पर्यग्निकरणं प्राकृतं नादृष्टार्थं भवेत्। सकृत् श्रुतं च पर्यग्निकरणमुत्तस्य (त्वाः ?) विधेयं त्रिवत्साल्लनूद्यमित्यपि न युक्तम्।

यदि क्रूरः कालो भवेत् बार्हस्पत्यश्चरुं निर्वपेत् यदि म्रियेत तदा वायव्यमित्यादिनैमित्तिकं प्रायश्चित्तं प्रागुक्तसङ्गादप्राकृतानां प्रपतनादिनिमित्तसम्भवादुपपत्स्येत।

ननु त्रीन् त्रीनुद्दत्य इति कर्मान्तरविधिपक्षेऽपि यैरेवोक्षभिः कर्मान्तरं कृतम् तानेवोद्दत्य आनीय सुत्यासु यागान्तरमस्तु, तांश्चैवोद्दत्य इति वचनबलात्।

मैवम्, तेषां निर्विष्टकत्वात्। अतो यागान्तरार्थमुक्षान्तरोपादाने तच्छब्दस्तज्जातीयापेक्षया तानेव शालीन्भुञ्जीतेतिवत्। तस्मान्मरुद्देवताकाश्चतुस्त्रिंशद्देवैते (?) यागा इति।

ननु मारुतीपदानुषङ्गो न युक्तः, स्त्रीलिङ्गविरोधात्। न च मारुतमात्रापेक्षयाऽन्वयः पश्चात्सङ्गत्यनुषङ्गोऽयं न तु नयनिबद्धोऽयमनुषङ्ग इति वाच्यम्, यत एवं शेते वाद्यः सन्नतां संयत्रैरङ्गानीत्यत्रापि क्रियामात्रं वचनरहितमपेक्षयाऽन्वीयेत पूर्णश्च पदं पदान्तरमाकाङ्क्षयतीति···ोक्तम्, अध्याहार एव स्यान्नानुषङ्ग इति।

न चोक्षव्यक्त्यपेक्षया स्त्रीलिङ्गं, न च मारुतपदमात्रस्य स्त्रीत्वं सविषयता उत यत्रापि स्त्रीत्वं सान्वयापत्तेः अनुषङ्गार्थं लक्षणायोगाच्च। न···सविषये मारुतपदे स्त्रीलिङ्गैकदेशार्थवादः एव·········मन्वयानर्हता। न त्वेवमनुषङ्गस्तुल्ययोगित्वाभावात् तथा सिद्धे ह्यनेकपरत्वे एवमपि कल्पना स्यात्।

उच्यते—स्यादेवं यदि मारुतीरित्येवपदं तत्र मरुतत्वं बोधयेत किन्तु चशब्द एव प्रातिपदिकार्थस्य सन्निहितार्थान्तरतुल्ययोगितां द्योतयतीति व्युत्पत्तिः ततश्च: यादृशः· यः तादृशः ध्वंस इति शब्दान्तरबोधितत्वादविरोध इत्यनुषङ्गरूपता।

चशब्दाभावे तु तुल्यरूपत्वे अन्यत्र न तथा। अत एव स्त्रीगताप्यमाँश्चेत्यत्र (?) गत इति धीः न तु स्त्रीगतः पुरुष इति। अत्राध्याहार एव पश्चात्सङ्गादनुषङ्गोक्तिः।

दशपेयाधिकरणम् ॥१३॥

दशपेये क्रयमतिकर्षात् प्रतिकर्षस्ततः प्राचां तत्समाने तन्त्रं स्यात् ॥११।२।५८॥

राजसूये दशवाजपेयाभिषेचनीयदशपेयावेकाहौ किं तयोः पदयोस्तन्त्रं न वा ?

ननु कालभेदाद्भेद एव युक्त इति कथं पूर्वपक्षः ? उच्यते—महसोऽसौ क्रीणातीति द्वयोः क्रयः प्रतिकृष्टः तद्बलाद्द्वयोः प्राचामङ्गानां प्रतिकर्षे तन्त्रता सहोपक्रान्तानाञ्च सहैव तन्त्रमेव

समाप्तिरिति पराचामेव तन्त्रता। ननु···त्राङ्गभूतस्य क्रयस्य प्रतिकर्षः, प्रधानकालबाधापत्तेः किन्त्वनङ्गभूतस्य सम्वादमात्रस्य। अत एवाध्वरकल्पायां न सर्वस्य निर्वापस्य प्रतिकर्षः किन्तु प्रातःकालीनस्यैवेत्युक्तम्।

मैवम्, अङ्ग एव सहत्वविधिर्युक्तः। अध्वरकल्पायामप्यङ्गस्यैव प्रतिकर्षः न च सम्वादक्रमः, किन्तु क्रयहेतुः।

राद्धान्तस्तु—सम्वादो मूल्यार्पणञ्च द्वयं क्रमपदवाच्यम् मूल्यसम्वादेऽपि क्रमपदप्रयोगात्। न च तदमुख्यार्थत्वापत्तेरिति वाच्यम्, एकेन स्वामिनो द्रव्यप्राप्त्यनुकूलानतिहेत्वसाधारणव्यापारत्वेनोपाधिना एकदैव मूल्यनिश्चये मूल्यार्पणे च व्युत्पत्तेः, पाचकादिवत्। मूल्यनिश्चयेप्यानर्नतिर्भवतिमात्रया मूल्यार्पणे च सा महती दृढा च द्वयञ्च तत्र प्राप्तौ हेतुः। साक्षाद्धेतुर्व्यापारोऽङ्गम् न तु पदार्थम्। न चैकैनोपलक्षणेनानेकत्र शक्त्यवधारणसम्भवे शक्तिभेद एक एवावृत्त्यन्तरं भवति त्रित्वचतुष्कादिवत्। आनता च द्रव्यप्राप्तिः फलं तद्धेतुता चासाधारण्येन मूल्यनिश्चयमूल्यार्पणयो. न तु विक्रेतृगृहगमनादेः।

अन्ये तु मूल्येन तावत्स्वामिनः क्रय्यद्रव्यप्राप्तिहेतुव्यापारो विक्रेत्रानत्यनुकूलः क्रयः एकेन चानेनोपाधिना सम्वादमूल्यदानपरिग्रहणयां क्रयपदवाच्यत्वेऽपि नानेकार्थत्वं न च विक्रेतृगृहगमने··एतस्य गतत्वात् नोपाधित्वम् यत उपाधिर्वाच्या व्यभिचारी भवति। न त्ववाच्यव्यावृत्त इति, तन्न, एवं मूल्यानतत्त्वादुत्तरोत्तरव्यापार क्रयः स्यात् न तु मूल्यसम्वादः। तथा सत्येव क्रयनिरूपणे क्रय्यताविक्रेतृतापि ज्ञेयेत्यन्योन्याश्रयमित्यादि चिन्त्यम्। एतेनेति निरस्तं द्रव्यगतस्वत्वरूपफलावच्छिन्न एव व्यापारनिश्चयः क्रीणातिपदवाच्यः इति पूर्वभागेऽपि सम्वादक्रयपदप्रयोगात् यथा चुल्लीसम्मार्जनादि कुर्वत्यपि पचतीति पदं तथा च सति मूल्यार्पणपर्य्यन्त एव क्रीणातिपदेनोद्दिष्टे सहत्वविधिर्न तु सम्वाद इति।

यत उक्तम्—सम्वादमात्रेऽपि क्रीणातिपदं लोकाः प्रयुञ्जते न तु चुल्लीसम्मार्जनमात्रे पचतीति पदं विजातीयत्वाल्लिप्यत इत्युक्तम्। इह तु पाचकादिवदन्यानपेक्षं वाच्यत्वम्। एवञ्च मूल्यपरिच्छेदात्क्रीतेपि न स्वत्वं किन्तु मूल्यार्पणात् अत एव दक्षिणार्पणात्पूर्वमेव क्रीतत्वमृत्विजां न च क्रयविधेः सम्वादोऽप्यङ्गसम्वादात्प्राप्तेः। प्रथमभाव्यपि सम्वादो न विधेयः किन्तु विहिते काले नियतस्य मूल्यस्यार्पणं क्रतुबहिर्मूल्यसम्वादे सति नियतत्वमिति बहि.···प्राप्ते सम्वादे उपकारके आश्रितोऽयं महत्त्वविधिः प्रणीताधर्मविधिवत्। अङ्गकालाबाधायैवोभयं क्रयपदवाच्यमिति निर्णय इति **केचित्**। तन्त्रभेदे च भेदेन दीक्षावभृथदर्शनं युज्यते। समानौ वा एतौ यज्ञौ यादृश्च वाजपेयाभिषेचनीयौ चेति समानत्वं तन्त्रताभेदात्किन्तु कालैक्यात् एकस्मिन्नृतावेतौ यतः।

वरुणप्राघासेऽवभृथाधिकरणम् ॥१४॥

निष्कासस्यावभृथे तदेकदेशत्वात्
पशुवत् प्रदानविप्रकर्षः स्यात् ॥११।२।६३॥

वरुणप्राघासे वारुण्यनिष्कासेन तुषैश्चावभृथमभ्यवयन्तीति किं प्रदानविप्रकर्षः उत प्रतिपत्तिः उतावभृथधर्मकं कर्मान्तरं प्रतिपत्तिपक्षश्च सन्देहकाले भाष्यानुक्तोऽपि निबद्धासिद्धान्त ...तकर्मान्तरविधिप्रतिपक्षतयोपन्यासः। अत्राद्यः पक्षः कुम्भैवामिक्षा वारुण्यामिक्षा इति वाक्येन विनियुक्तेति तदेकदेशोऽन्यत्र विनियोक्तुमशक्यः। अतः समिष्ठयजुष ऊर्ध्वं नीतस्य वरुणाय दानमिति दानविप्रकर्षः। यथा पशोर्वपया प्रातःसवने चरन्ति। अङ्गैस्तृतीयसवन इति च। तदा चास्मिन्नेव यागेऽवभृथपदं नामदेवता साम्याद्गौण्या वृत्त्यानुवादः।

द्वितीयस्तु तृतीयाश्रवणेऽपि प्रयाजशेषवदुपयुक्तामिक्षाशेषस्य निष्कासस्य प्रतिपत्तिरपेक्षिता। अवभृथपदं देशलक्षणया सार्थिकम् मासलिप्तवत्। अन्यथा तद्व्यर्थमेव स्यात्। अत्र च तुषैश्च तन्त्रीकृत्य चिन्ता अन्यथा पूर्वपक्षद्वयैकस्थान्वयित्वासा(?)म्यं स्यात्।

राद्धान्तस्तु—चातुर्मास्येऽवभृथाभावात्तदेव लक्षणा नास्ति। सोमलिप्ते त्ववभृथसद्भावात्तदेषा लक्षणाऽस्तु। न च धर्मलक्षणाप्रतिपत्तेर्नयनरूपायाः प्रधानयागधर्मानर्हत्वात्। अतोऽवभृथपदसार्थकत्वाय तद्धर्मकयागान्तरविधिः निष्कासस्यान्यार्थतां हित्वा स्वरूपेण।

उदयनीयनिर्वापस्य संस्कारकर्मताधिकरणम् ॥१५॥

उदयनीये च तद्वत् ॥११।२।६६॥

सोमे प्रापणीयस्य निष्कासेन उदयनीयो हविःसंस्कारः। तत्राद्यः पक्षः यद्यप्यत्र प्रकृत उदयनीयोऽस्ति, तथापि न तत्र निष्कासद्रव्यविधिरुत्पत्तिनिष्ठद्रव्यान्तरावरुद्धत्वात्। अत उदनीयधर्मककर्मान्तरविधिः पूर्ववत्तदा च भेदेऽङ्गानीति सङ्गतिः। द्वितीयस्तु मुख्ये प्रकृत उदयनीये सति तन्निर्वापसम्बन्धेन प्रतिपत्तिर्निष्कासस्योपयुक्तशेषस्य न तूदयनीयपदे धर्मे लक्षणा युक्ता। न चोदयनीयपदं हित्वा कर्मान्तरविधिः सम्भूयकारित्वात्।

राद्धान्तस्तु—न निष्कासप्रतिपादकतयोदयनीयनिर्वापविधिः। उदयनीयस्य शेषितया विध्ययोगेन विशिष्टविधानायोगात् उदयशब्दोऽनर्थकः स्यात् निर्वापलक्षणार्थो वा।

न च कार्यान्वयित्वे सम्भवत्युपलक्षणता न्याय्या। अत उदयनीयशब्देनोदयनीयहविःशेषितया बोध्यत इति तत्संस्कारकतया प्रापणीयनिष्कासविधिः। एवमुदयनीयपदं कार्यान्वयि स्यात्। शे··(षे)ण परत्वात्।

नन्वेवमपि प्रापणीयपदं कार्यान्वयि न स्यात् न प्रकृतोदयनीयशेषसिद्धे तथास्तु उपयोक्ष्यमाणसंकाराच्चेति।

इति प्रभाकरैकदेशीयचन्द्रकृतायां मीमांसासूत्रव्याख्यायाम् एकादशाध्यायस्य द्वितीयः पादः।

अथ एकादशाध्यायस्य तृतीयः पादः

वेदाद्यङ्गानां प्रधानकालान्यकालकर्तव्यताधिकरणम् ॥१॥

अङ्गानां मुख्यकालत्वाद्वचनादन्यकालत्वम् ॥११.३.१॥

द्वितीयपादार्थे अङ्गानां मुख्यदेशकालकर्तृत्वमुक्तं वचनात्पुनरन्यकालीनत्वमुक्तम्। यथा पूर्वेद्युरमावास्यायां वेदिं करोति। अप्स्ववभृथेन चरन्तीति अग्नौ सौत्रामण्यां दक्षिणाभेदादन्यकर्तृकत्वं विज्ञायते। वडवा दक्षिणेति श्रुतेः। अत्र च न्यायवचनयोर्बलाबलञ्चिन्त्यते।

तत्र **पूर्वपक्षः**—न न्यायो नामान्यः किन्तु वचनार्थावधारणम्। प्रयोगे हि कालादीनामपेक्षितत्वात्साङ्गप्रधाने कालादिः। अत एतदपि वचनान्तरगम्यमिति वचनान्तरेण विकल्पः। एवं कदाचित्तन्त्रत्वमिति।

राद्धान्तस्तु—वाक्यायत्ताङ्गे देशादिविधिः उत देशाद्यन्तरापेक्षेति तं हित्वा साङ्गे प्रधानदेशादिविधिः न्यायो वचनबाध्यः।

न च सामान्यस्य विशेषणबाधः स्थित एव। सत्यम्, किन्तु वाक्यद्वयस्यैव न्यायापेक्षेत्यविशेषशङ्कापेक्षाऽभावान्निरस्ता।

यद्वा सामान्यविशेषनये सत्यामपि बुद्धौ सामान्यपदस्य तत्र तात्पर्याभावः। इह तु न्यायहानमेवेति न्यायबाधोक्तिः ज्ञानकारणीभूतवाक्यार्थबोधादिति कर्तव्यता न्यायो बाध्यः॥

आधानादेः तन्त्रेणानुष्ठानाधिकरणम् ॥२॥

द्रव्यस्य कर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात् स्वकालत्वात् ॥११।३।२॥

निरस्तमप्याधानस्य क्रत्वर्थत्वमभ्युपगम्य चिन्ता किं प्रतिप्रधानं भेदनाधान्तं तन्त्रं अथ वा तत्र यूपोत्पादकभेदनादेरिवाधानात्तन्त्रत्वमिति **पूर्वपक्षः**। स्वकालत्वात्तन्त्रमिति **राद्धान्तः**।

स्वकालान्तेऽप्याधानस्य यदि क्रत्वङ्गस्व सतोऽग्न्युत्पादकत्वं तदा यदनन्तरमेव चिकीर्षितं तदर्थमेवाधानानुष्ठानं प्रकृत्यर्थे वा स्यादिति चेत्तत्कर्मार्थतैव नास्तीत्युक्तम्।

अत्राभिप्रायः—सप्तदशसामिधेनीरितिवत्क्रत्वर्थस्य सतो नाग्न्यर्थत्वं येनातन्त्रता स्यात्। उत्पन्नानामग्नीनां विनियोगात्र साप्तदश्यनयो न वा च्छेदनादिनयः प्रकरणामाम्नानात्। आहिताग्निविनियोगेन वाधानस्यापि विशेषत्वे सुबन्तवत्सकृदुपात्तस्यैव एकस्य सर्वार्थताप्रतीतेः।

Scanned with OKEN Scanner

सर्वार्थमाधानं सकृदेव भवतीति नाधानमतन्त्रम्। तादृगनुष्ठानारम्भकृतिसाध्यत्वात्सर्वापूर्वाणां न भेदनाधिकृतकर्तृता। वस्तुतश्चात्र विशिष्टविधानाभावान्न विशेषाधानविधिराहवनीया-दिपदैरिति।

अग्नीषोमीयादिषु यूपस्य तन्त्रेणानुष्ठानाधिकरणम् ॥३॥

यूपश्चाकर्मकालत्वात् ॥११।३।३॥

सोमे दै· · सवनीयार्थवन्याः पशवः। तत्र किं यूपस्तन्त्रं न वा? ननु दीक्षन्न (?) यूपं छिनत्तीति श्रुतिर्दीक्षाकालत्वेन यूपोत्पत्तिः स्वकालत्वादाधानतन्त्रैव युक्तेति कथं **पूर्वपक्षः**।

उच्यते—नात्र यूपोत्पादकस्य सतः क्रत्वर्थत्वं किन्तु प्रकरणाम्नानात्क्रत्वर्थस्य सतो यूपार्थता। अतो यथार्थत्वेन छेदनेन यूपो जनितः स एव तदर्थो नान्य इति तत्कर्मापवर्गे यूपनाशः।

राद्धान्तस्तु—सोमे दीक्षाकालस्यान्यस्याभावाद्देशाद्यैक्ये छेदनादिप्रयोगाविशेषात्सर्वपशुषु तन्त्रं यूपोत्पत्तिः, न तु दीक्षाकाल एव भेदेनेति नोद्देश्यताविशेषो यूपोत्पत्तौ हेतुः। तथा सवनीये पशौ त्रिवृता यूपं परिधीयेति त्रिवृतापरिव्या (धा?) नविधिः यूपैक्ये युक्तः यूपान्तरे च चोदकप्राप्तं न विधेयं स्यादिति।

यूपसंस्काराणां तन्त्रेणानुष्ठानाधिकरणम् ॥४॥

संस्कारास्त्वावर्तेरन्नर्थकालत्वात् ॥११।३।५॥

तत्रैव तक्षणादि तन्त्रं न वा इति **पूर्वपक्षः**। आदावनपेक्षश्रुतं छेदनमात्रं यूपोत्पादकं तक्षणादि तूत्पन्नसंस्कारकं दीक्षितदण्डवत्। यूपोत्पत्तिश्च दीक्षितकालेति तन्मात्रं तन्त्रं न तु नियोजनकालीनं तक्षणादि। तस्मादङ्गकालभेदादावृत्तिः।

राद्धान्तस्तु—यूपं छिनत्तीत्येवमादेरयमर्थः-खदिरादिच्छिनत्ति तक्षति छेदनादेश्च भिन्नं दृष्टं नियमाददृष्टार्थविरुद्धमिति समुच्चयार्हम्। तथा यूपशब्दस्य मिलितच्छेदनादिजनितवाच्यतैव युक्ता, अन्यथा न्याय्यानेकार्थता स्यात्।

यूपपदप्रयोगोऽपि मिलिततक्षणाद्यनन्तरमेवेति सर्वोत्पाद्यता श्रुतेरविशेषात् छेदनप्राथम्यं प्रागर्थं स्यात्। अत एव यूपाद्गतिरपि यूपोत्पत्त्यर्था दीक्षा तु दीक्षिष्यमाण इत्यादौ नैरपेक्ष्यश्रुतेर्दीक्षणीयामात्रसाध्या। दण्डेन दीक्षमतीत्यत्र विधेयभावात्र विशेषाभावात्र समकालीनता, किन्त्वेकदानुकल्पना दोषादुत्तरकालत्वाच्चोत्पन्नसंस्कारकतैव।

एवञ्च यूपोत्पत्तिप्रयोगे दीक्षाकालविधौ भेदनग्रहणं प्रदर्शनमात्रान्न विवक्षितम्।

Scanned with OKEN Scanner

स्वरुतन्त्रताधिकरणम् ॥५॥

स्वरुस्तन्त्रापवर्गः स्यादस्वकालत्वात् ॥११।३।८॥

तत्रैव तां किं यूपैकत्वात्सर्वपशूनां······(स्व)रुस्तन्त्रं न वा चतुर्थोक्तेऽपि···(स्व)रोर्यूपार्थनिष्पन्नत्वे यूपोत्पत्तिमात्रापकर्षे···(स्व)रोः प्रधानपश्वञ्जनकाल एवादानमिति प्रतिपशुप्रयोगमावृत्तिरिति **पूर्वपक्ष**. ।

नन्वेकयूपत्वेनेकप्रथमांशकालाभावात्स्वरुभेदो न शक्यः, मैवम्, प्रतिप्रहारं प्रथमशकलभेदान्न दोषः। एकस्मिन् प्रहारेऽनेकशकलनिस्सरणे यः प्रथमः स स्वरुरेवं प्रहारबहुत्वे बहुप्रथमशकलसम्भवः ।

राद्धान्तस्तु—शकलमात्रापेक्षप्राथम्ये सम्भवति नैकप्रहारे ये शकलास्तेषां यः प्रथमः शकल इति प्रहारापेक्षापि युक्ता नैरपेक्ष्यात् । शकलमपेक्ष्यैव शीघ्रं प्रथमप्रतीतेर्नाश्रुतमधिकप्रहारापेक्षया शास्त्रार्थत्वं कल्प्यम् । एवमनेकप्रथमशकलासम्भवान्न स्वरुभेदः । तथा यूपस्य स्वरुं करोतीति यूपार्थनिष्पन्नं वपादतोति(?) वाक्यार्थः । यूपोत्पत्तिकाल एवार्थनिष्पन्नतेति तत्काल एव स्वरोरादानं तथोपात्तस्य सतः स्वरोरञ्जने विनियोग इति न प्रधानाञ्जनकालीनता स्वरोर्येन तद्भेदः, किन्तु यूपकालैक्यात्तन्त्रता लिङ्गम् । स्वरोः सोमान्ते प्रतिपत्तिः संस्थिते सोमे प्रस्तरं प्रहरति स्वरुञ्चेति स्वरोस्तन्त्रत्वे । अन्यथा दैक्षपश्वन्ते च स्यात् । न च मेय्यर्थवन्यपशोरियं स्वरुप्रतिपत्तिः प्रस्तरप्रतिपत्तिरेवेति वाच्यम् । यत उद्दिष्टेयं प्रतिपत्तिः । सर्वत्रोपदिष्टं दैक्ष एव । प्रस्तरप्रतिपत्तिस्तु दृष्टार्थवन्ध्यस्याप्यस्तु ।

न चैवं दैक्ष्यस्वरोरेव वचनबलादन्ते प्रतिपत्तिविधिः । एवमग्नौ प्रहरणं सोमान्ते च प्रत्यनेकविधिः । तन्त्रत्वे सोमान्त एवार्थात्प्रतिपत्तिप्राप्तौ नानेकविधिः ।

न च तन्त्रत्वेऽप्यनेकविधिताहानायार्थ···एवायमुपदेशो न्यायतो दैक्ष एवोपदेश इति हानापत्तेः । तन्त्रत्वे तु सर्वमौरस्यम् ।

कृष्णविषाणाप्रासनाधिकरणम् ॥६॥

अहर्गणे विषाणाप्रासनं धर्मविप्रतिषेधादन्ते प्रथमे वाहनि विकल्पः स्यात् ॥११।३।१२॥

सोमे दीक्षितव्रतं कृष्णविषाणया कण्डूयति । तस्याः प्रतिपत्तिः । नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति तदहर्गणेऽतिदिष्टम् । तत्र किमाद्येऽन्त्ये चाहनि तस्याः

प्रासनम्, उतान्त्य एवेति पूर्वपक्षः। प्रकृतौ दक्षिणामयत्वात् प्राचामङ्गानां विषाणाकण्डूयनं धर्मः। पराचां हस्तकण्डूयनम्। तत्र यद्याद्येऽप्यहनि प्रासनं तदाऽन्त्याहः स्वपाणिना कण्डूयनं न विषाणया।

अथान्त्ये न तदा पाणिना पाणिकण्डूयनमपि चाङ्गम्, अर्थस्यापि नियोगप्रयुक्तस्य शास्त्रार्थत्वात् न तु वाचनिकमा'''स्वेति न शास्त्रार्थत्वे विशेषः। अतो विकल्पः। आद्येऽन्त्ये चाहनि प्रासनम्।

ननु प्रत्यहं विषाणाग्रहहानाभ्यां विषाणया पाणिना च कण्डूयनमस्तु, मैवम्। कण्डूयनेनाव्याक्षिप्तचित्तः कर्ता स्वयं कर्मानुतिष्ठतीति कण्डूयनं प्रयोगाङ्गं कर्तृधर्मः। तद्धर्मश्च सकृदेवोपादेयो हेयो वा। अन्यथा प्राकृता च स्यात्। अहरुत्पत्तिकालभेदस्तु न प्रयोगभेदकः; प्राकृतार्थहाने प्रासनमप्राकृतार्थं स्यात्।

न च पाणिस्थविषाणस्यैव पाणिना कण्डूयनात्तस्यार्थग्रहः। तदा हि तत्पाणिदुष्करम्, तथा प्रतिपत्तिबलादेवोत्तरेषां पाणिकण्डूयनात् पाणिस्थत्वे तु तथैव कण्डूयनं प्राप्तं प्राकृतकार्यं तद्धीयते।

राद्धान्तस्तु प्रयुक्तस्यापि न विनियोगविरोधेन शास्त्रार्थता हन्ति विधावेव दल'''नादेः। अतः कांस्यमोचिनयादुत्तरेषामह्नामङ्गाहानायान्त्य एव प्रासनम्। पाणिकण्डूयनबाधो हि न कस्य चिद्वैगुण्यम्। अतो यद्यपि दक्षिणानया(य)नादुत्तरेषामनङ्गं विषाणया कण्डूयनं तदाप्यहरन्तरे दक्षिणानयात् प्राचां विरोधापत्तेः। सर्वत्र विषाणया कण्डूयनमिति।

राजसूये नानाबीजेषु वाग्विसर्गस्य चरमकालनियमाधिकरणम् ॥७॥

वाग्विसर्गो हविष्कृता बीजभेदे तथा स्यात् ॥११।३।१५॥

प्रकृतौ हन्तिकाले हविष्कृदाह्वानं श्रुतम्। तदापः प्रणेष्यन् वाचं यच्छति। तां स हविष्कृता विसृजतीति हविष्कृदाह्वानकाले वाग्विसर्गः। श्रुतं तद्राजसूये नानाबीजेष्टौ चोदकं प्राप्तम्। तत्रैक अदूषणाम्वसनं क्रमेण च विघातः। तत्र किमाद्येऽन्त्ये हविष्कृदाह्वाने काले वा वाग्विसर्गः कार्यः उतान्त्य एव। तथैव पूर्वोत्तरपक्षौ।

विशेषश्चेत्थम्। आथर्वाङ्गयोरसाम्यादस्तु पूर्वत्र प्रासनमन्त्ये च। इह तु वाग्विसर्गोऽपि श्रुत एवाङ्गमिति वाग्यमविसर्गयोर्विकल्पः इति **पूर्वपक्षः**।

राद्धान्तस्तु हविष्कृदाह्वानेऽवश्यकर्तव्ये तदर्थमर्थादेव वाग्विसर्गः प्राप्तः इति। तत्रापि तत्रार्थ्यतेति न कल्पः किन्तु कदाचाविस्यपेक्षायां तां स हविष्कृतेति वाक्येन हविष्कृदाह्वान-

कालमात्रविधिरित्युत्तरेषां वाग्यमाय कांस्यभोजिनयादन्यत्र च वाग्विसर्गः। अन्यहन्तिकालस्याप्याह्वानकालत्वात्।

अग्नीषोमीये पौरोडाशिककाल एव वाग्विसर्गाधिकरणम् ॥८॥

पशौ च पुरोडाशे समानतन्त्रं भवेत् ॥११।३।१७॥

दैवे पशौ पशुपुरोडाशे। तत्रैव चिन्ता किं पाशुकहविष्कृदाह्वानकाले वाग्विसर्गः, उत पौरोडाशिके? तत्र पशावपि हविष्कृदाह्वानमस्तीति कृत्वा चिन्ता।

ननु कृत्वा चिन्तया विषयो लभ्यते। स च सर्वमेव लब्धो न्याये तु विशेष इति कथमियं चिन्ता। पशुप्रसङ्गोपजीवी पुरोडाशः। पशुश्च सायंप्रातः स्थितः। अतः सायंपर्यन्तेन पश्वर्थवाग्यमेन पुरोडाशेऽपि वाग्यमः सिद्धः इति पूर्वस्मात्केन विशेषेणात्रापूर्वफला कस्त्वाधिको न्यायो व्युत्पाद्यः।

उच्यते, निबन्धने पुरोडाशप्रसङ्गोपजीवी पशुरिति कृत्वा चिन्तान्तरम्। तत्राद्ये पुरोडाशहविष्कृदाह्वानकाले एव वाग्विसर्गः इति। तदा च पुरोडाशेन वाग्यमेन पशोरपि प्रसङ्गात्कार्यसिद्धमतः पुरोडाशेऽपि वाग्विसर्गेन पशोर्वैगुण्यम्।

राद्धान्तस्तु—दृष्टार्थत्वाद्वाग्यमस्य नान्यार्थेनान्यत्र कार्यं सिद्ध्यति। वाग्मेनाव्याक्षिप्तचित्तः स्वयं कर्मानुतिष्ठतीति पाशुकहविष्कृदाह्वानकालान्त एव वाग्विसर्गः लक्ष्यम्।

पशुरेव तन्त्रीति न कृत्वा चिन्तान्तरं **पूर्वपक्षः**। यद्यपि पश्वर्थेन वाग्मनोवृत्तं कार्यं प्रसङ्गिनः पुरोडाशस्य, तथाप्यन्यार्थोपान्तवाग्यमेन पुनरुपादानं नहि प्रसङ्गी पुनः प्रयुङ्क्ते।

राद्धान्तस्तु—युक्तावेद्यादावुपादानकृतार्थता उपादान्तेन कार्यशक्तेः। इह तु न तथेति अन्त एव वाग्विसर्गः।

अग्निचयनेऽग्निविमोकस्य मतभेदेन व्यवस्थाधिकरणम् ॥९॥

अग्नियोगः सोमकाले तदर्थत्वात् संस्कृतकर्मणः परेषु साङ्गस्य तस्मात्सर्वापवर्गे विमोकः स्यात् ॥११।३।१८॥

अग्निसंयोगं जुहोतीत्यग्निसंयोगहोमोऽस्ति। तथा विमोकहोम। स किं योगहोमोऽङ्गप्रधानार्थः। तदा चाङ्गप्रधानापवर्गे विमे(मो)कहोमः, उत प्रधानमात्रार्थः? प्रधानमात्राप च विमोकहोमः।

ननु पञ्चभिर्युनक्ति पाङ्क्तो यज्ञ इत्यर्थवादाद्यज्ञशब्दो वाच्यप्रधानयागप्राप्त्यर्थताग्नेयो होमस्य याज्ञिकप्रयोगनियमाद्धि यज्ञशब्दः प्रधानयागवाची। तत्र च सजातीययागापेक्षयैव प्राधान्यमतः कथं **पूर्वपक्षः** ।

उच्यते—अग्नियोगं जुहोतीत्यग्न्यर्थता होमस्य प्रतीयते । अग्निश्चाङ्गप्रधानहोमार्थ इति तद्वाराङ्गप्रधानार्थता निःसन्दिग्धा । सन्दिग्धे च वाक्यशेषान्निर्णयः । अतो यज्ञशब्दः प्रयोगलक्षणयाप्युपपद्यते । सर्वस्यैवा(?)यज्ञायाज्यं यद्ध्रुवायामितिवत् ।

राद्धान्तस्तु— सत्यं विध्युद्देशे न सन्देहः । तथाप्यर्थवादेतिपरोक्षावृत्तिर्निष्प्रयोजनता च मा भूदिति प्रधानमात्रार्थतैव न श्रुतिहानं विध्युद्देशे वरं संकोचः । न तु शेषप्रयोगलक्षणा कांस्यभोजिनयात् । अत एव स्ववसलभ्यं स्वर्गम्विहाय वाक्यशेषस्थफलग्रहः ।

सुत्याकालीनसुब्रह्मण्याह्वानस्य भेदेनानुष्ठानाधिकरणम् ॥१०॥

लिङ्गदर्शनाच्च ॥११।३।२९॥

यदि वाक्यशेषस्थयज्ञशब्दबलान्न प्रधानयागमात्रार्थता तदा सोमेऽपि होतृश्रवणं वाक्यशेषस्थयज्ञश्रुतिबलान्न प्रधानमात्रार्थं किन्तु साङ्गप्रधानार्थमिति ।

अवभृथे तेन प्राकृतस्य होतृश्रवणस्य प्रत्याम्नायात् प्रसक्त्यभावेन होतारं वृणीते इत्यवभृथे तन्निषेधो न स्यात् ।

नन्ववभृथस्यापूर्वत्वात्प्राकृतस्य होतृवरणस्य सिद्धान्तेऽपि प्रसक्त्यभावान्नित्यार्थवादोऽयं पूर्वपक्षेऽप्यवरुद्धः ।

उच्यते—लाघवादपूर्वतैवास्येत्थं स्तूयते । अतोऽपूर्वत्वविधानात्प्राक्प्रसक्तौ सत्यां लाघवादपूर्वत्वस्तुतिरित्थं युक्ता । नान्यथा लिङ्गान्तरम् अहर्गणे । अहरहर्युनक्ति अञ्जतीति प्रत्यहं योगमोकदर्शनप्रधानमात्रार्थत्वे युज्यते । अन्यथा त्वाग्रेहनि मोकः स्यात् ।

न च योगः कर्तृसंस्कारको येन प्रधानमात्रार्थत्वेऽप्यन्त एव मोकः स्यादिति ।

द्वादशाहे उपसत्कालं स्वब्रह्मण्याह्वानं पृथक्कालत्वात्तन्त्रं दीक्षावदीक्षाकालीनयूपच्छेदनादिवच्चेति सिद्धमुत्तरचिन्तार्थमुक्तम् ।

सुत्याकालीनं तन्त्रं न वा ? राद्धान्ताभासशङ्कानिराकरणमात्रात् पूर्वपक्षः । अद्य सुत्यामागच्छ मघवन्निति प्रकृतौ अद्येतिविवक्षितत्वादहर्गणेऽहर्भेदेन सुब्रह्मण्येति राद्धान्ताभासः । स चायुक्तः । सुत्यान्वयप्रकाशनमात्रस्य विवक्षितत्वात् प्रकृतौ चैकत्वादाद्येति प्राप्तार्थवादमात्रम् । अतस्तन्त्रं सुब्रह्मण्येति **पूर्वपक्षः** ।

Scanned with OKEN Scanner

राद्धान्तस्तु—न ब्रूमोऽग्रपदस्य विवक्षितत्वादावृत्तिः किन्तु कालभेदेन विशेषग्रहात् । अगृह्यमाणे हि विशेषे तन्त्रतेत्यङ्गम् । अतः प्रधानकालभेदादङ्गादावृत्तिः ।

देशकर्तृविषयेऽनियमाधिकरणम् ॥१२॥

लौकिके तु यथाकामी संस्कारानर्थलोपात् ॥११।३।३३॥

किं कर्ता ऋत्विजः, देशः स्रुगादिपात्राणि जुह्वादीनि कर्मान्तरेऽन्यान्येव उत ते (तानि ?) वा अन्ये (अन्यानि ?) वा इत्यनियमः । अत्र चालौकिकबलादुत्थाप्यम् ऋत्विष्टमाश्रित्य नेयं चिन्ता तदा प्रयोगापवर्गित्वात्, तथा देशपात्रयोः कारकतामाश्रित्य नेयश्चिन्ता, तेषां वैदिकत्वात्, किन्तु अधिष्ठाने लोके **पूर्वपक्षः** । अधिष्ठानान्तरस्वाग्यं तेषां निरिष्टिकत्वात् ।

राद्धान्तस्तु—कृतवैदिककर्मणां वैदिककर्मानर्हतारूपा ···· कता ···· तल्लक्षणं वेदे स्मृतौ चास्ति, किन्तु शिष्टाचारसिद्धम् । न चैतेषु शिष्टानां परम्परासिद्धा निरिष्टकता धीरिति तान्यन्यानि वा ।

ननु ऋत्विगाचार्यौ नातिचरितव्याविति श्रुतेस्तैरेव भाव्यम् । मैवम् । पुरुषार्थोऽयमनभिधावनिवृत्तिरतस्तदतिक्रमे न क्रतोर्वैगुण्यम् ।

वस्तुतस्तु अभिचारो न वैपरीत्यं, द्वेष्यतापि तथा न त्वन्योपादनं वैपरीत्यम् ।

पात्राणां तन्त्रस्य नियमाधिकरणम् ॥१३॥

यज्ञायुधानि धार्येरन् प्रतिपत्तिविधानादृजीषवत् ॥११।३।३४॥

किमाहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेत्यर्थकर्मप्रतिपत्तिर्वा । तत्रार्थकर्मत्वे पात्राणि यत्नाद्धार्याणि । प्रतिपत्तिपक्षे तु न यत्नेनैव धार्याणि किन्तु स्थितानि नान्यथा त्यजन्ते, तथा भाष्ये त्वर्थकर्मत्वपक्षे इदमेव धार्यत्वं प्रयोजनमुक्तम् आशीःसाम्यवैषम्याभ्याम् । तथा हि प्रकृतौ पयोव्रतविधानात् ।

पयोर्थे गौर्दुग्धा । तथा आशीराख्यकर्मार्थञ्च सैव दुग्धा । विकृतौ च ऋतपेये घृतव्रतौ भवत इति विधानाद्घृतत्वं हि निवृत्तायां यथा अन्या गौराशीरर्थे प्रयुज्यते तथा प्राच्यत्वकर्मत्वपक्षे यज्ञव्यावृत्तपात्रान्तरप्रवृत्तिरस्तु । नाभूयत्नात्पात्रावधारणमिति साम्यमुक्तम् । अस्तु तत्र घृतव्रतौ भवत इति वचनबलाद्धृतदुहो निवृत्तौ अन्यप्रयुक्तिः । इह तु यज्ञपात्रैश्चेति श्रुतेर्बाधो न न्याय्यो धारणेन यज्ञव्यावृत्तानामेव पात्राणां सम्भवात् ।

नन्वर्थकर्मत्वपक्षेऽपि यागाहन्येव मृतस्य यज्ञपात्रैर्दाहसम्भवे किं धारणप्रयुक्त्यान्यथा सान्नाय्यार्थया शाखया उपवेशविधिः सान्नाय्य एव नासन्नयत इति, मैवम् ।

उपवेशो ह्यसानाय्यिना अन्यार्थोपात्तशाखामूलसाध्योऽशक्यः । इह तु धारणाद्यशपात्रैर्हि-नान्तरेपि मृतस्य दाहः शक्य इति तदेवमर्थकर्मत्वे यत्नेन धार्यता न प्रतिपत्ताविति चिन्ताफलम् ।

यद्यपीयश्चिन्ता शेषत्वरूपा तथापि पूर्वदेशकर्तृपात्राणां निरिष्टिकतया प्रयोगान्तरेऽन्यत्वमेवेति निरासे कर्तृदेशयोरनियमस्तान्यन्यानि वा पात्रे क्षतदेहदाहाख्यहेत्वन्तरत्वात्......न तान्येवेति फलमिति पूर्वनयफलप्रभेदतयेहमिह(?) चिन्ता प्रसक्ता **पूर्वपक्षः** । दाहस्तावद्देहसंस्कारकतयाऽविशेषविहितो यजमानेऽपि प्राप्तो न प्राप्तार्थः, किन्तु निरूढकार्ये पात्राणामेव विधिः। पात्रैश्चेति तृतीयाश्रवणात् । गुणत्वावगतेर्वरमधिष्ठानलक्षणा... ..शेषे तु नाभिघारणं निरूढकार्ये तदा च दाहाक्षिप्तपात्रासादने शेषविधिमात्राल्लाघवम् । दक्षिणे पाणौ......मासादयतीत्यादावपेक्षितविधानञ्च भाव्युपयोगदाहे दृष्टार्थसहकृततृतीयया च प्रयाजशेषन्यायहानमिति ।

एवं स्थिते यवतो धारणेऽन्तरा चिन्ता किं प्रकृतितः पौर्णमासीत आरभ्य पात्राणि धार्याणि उत विकृतितः पवमाने स्थितः । तत्रान्तरा **पूर्वपक्षः** **प्रकृतौ** यज्ञपात्रोपदेशा यज्ञपात्रैश्चेति श्रुतिः शीघ्रमिति प्रकृतितः आरभ्य धारणमिति ।

राद्धान्तस्तु—कार्यतः प्राप्तोपादानमग्रतः पवमानेष्टाविति वस्तुसिद्धौ शैघ्र्यं यज्ञपात्रमात्रञ्चाविशेषतः प्रतीतं न ह्युपदिष्टे यज्ञपात्राभिधानं शीघ्रम् अभिधानात एव हि शीघ्रतायोगादिव रूढैरुत्तरासंज्ञकानाम्। तथा च कृतपरमानेष्टेर्म्मरणे यज्ञपात्रैर्दहन्तीत्यभिधानं सुस्थितमिति मरणस्यानियतत्वात् विकृतित एवारभ्य धार्य्याणीति ।

मूलराद्धान्तस्तु—दक्षिणे पाणौ ऋजुमासादयतीति द्वितीया श्रुत्या शीघ्रं पात्रार्थतया आसादनं विनियुज्यते। तदा चासादनं कृतकार्यपात्रप्रतिपत्तिरूपमेव प्रतीयते। भावार्थविधिश्चैवं स्यात्तत्पूर्वकञ्च यज्ञपात्रैश्चेति वाक्यमतः प्रतिपाद्ययज्ञमुखेन प्रतिपत्तिरियं यज्ञाङ्गम् । तदा च यदा पत्रनाशस्तदा प्रतिपत्तेरनङ्गत्वात् साङ्गश्चित्राद्यैहिकफलं नान्यथा, पवमानेष्ट्यादौ त्वनन्तरकालीनताविरोधान्मा भूदस्याङ्गता ।

अन्ये त्वाहुः—प्रतिपत्तित्वेऽपि अस्यानङ्गत्वं किन्तु स्वातन्त्र्यमेव पर्णतादेर्हि स्ववाक्येऽधिकार्यश्रुतेरस्तु द्रव्यद्वाराङ्गता। अत्र तु द्रव्यवतः स्ववाक्येऽधिकारश्रुतेर्नाङ्गता, पर्णताविधिकाले चानागते साधनोत्पत्त्यारम्भजुह्वादेः क्रत्वर्थता नापगमादिति ।

तन्न, गुणकर्मणां सावकाशविषयत्वात् अतीतसाधनसंस्कारकत्वाच्च । प्रतिपत्तीनां कथञ्चिद्द्रव्यमुखोपस्थितित्वेनान्वयः ।

सर्वसोमानामुपरिष्टात्प्राजापत्यप्रचाराधिकरणम् ॥१५॥

Scanned with OKEN Scanner

उपरिष्टात्सोमानां प्राजापत्यैश्चरन्तीति सर्वेषामविशेषादवाच्यो हि प्रकृतिकालः* ॥११।३।४६॥

वाजपेये श्रुताः प्राजापत्याः पशवः। तत्रोपरिष्टात् सोमानां प्राजापत्यैश्चरन्तीति श्रुतेः चिन्ता किमार्भवे काले प्रचरितव्यम् उत शस्त्रवताम्? सोमानामुपरिष्टात्तार्तीयसवनिकस्य वैश्वदेवस्यार्द्धमित्यर्थः।

अथ वाधिकारस्थाने अग्निष्टोमसंस्थाविकाराया उक्थ्यायाः संस्थास्तासां यत्स्थानमग्निष्टोमप्रचारादूर्ध्वमुत सर्वसोमानामुपरिष्टादिति।

ननु च कालविशेषशेषचिन्तात्रासङ्गता। तथा अविशेषात्सर्वसोमानामेवोपरिष्टात् प्रचारो युक्त इति कथं **पूर्वपक्षः**? उच्यते—

यदि सर्वसोमानामुपरि च तत्त्वत्र साङ्गप्रधानपश्वनुष्ठानरूपे प्रचारेऽङ्गविपर्य्यास इत्याग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीति प्रहृत्य परिधीन् जुहोति हारियोजनमित्युभयं विपर्यस्येत। नाग्निमारुतादूर्ध्वमनुयाजैश्चर्येत। न वा हुत्वा हारियोजनं परिधयः प्रह्रियेरन्।

अथार्भवकाले प्रचारस्ततो नायं दोषः। यद्वा आर्भवकालस्य चोदकप्राप्तत्वेन विध्ययोगात् प्रकृतिकालासत्तेः। शस्त्रवतां सोमानामुपरि प्रचारः।

यद्वा आसत्तावपि न प्राकृतः कालो लभ्यते। तद्वरं विकारस्थानेऽस्तु। तद्धि सर्वेषामागन्तूनां स्थानम्। अयमपि चागन्तुः। अत्राप्यविशेषात् वचनबलाद्यदि सर्वसोमानामुपरिष्टात्प्राजापत्याः स्युः तदा च ऋतुपशूनामनुयाजाग्निमारुतादूर्ध्वे भेदेन कार्याः। प्रदूरणञ्चाभेदेन कार्यमिति तन्त्रभेदः स्यात्। तस्मान्न सर्वसोमानामुपरि प्राजापत्याः। एवञ्च तत्र चिन्तेयं तदा च दाहे श्रुतमन्त्र एवास्तु। सोमानामुपरिष्टाच्छ्रुतं मध्येऽपि शक्यमित्युत्थानादवान्तरसङ्गतिः।

राद्धान्तस्तु—सर्वसोमानामेवोपरिष्टात्प्राजापत्याः स्युरविशेषात्।

अन्ये तु यदि केषाञ्चित्सोमानामुपरिष्टादपि क्रियेरन् तदोपरिभावो न स्यादिति राद्धान्तयन्ति। तन्न। तेषां मते उपरिभावस्यापेक्षिकत्वात्किमित्यधस्ताद्भावेऽपि काञ्चित्सोमानपेक्ष्यमुपरिभावो न भवेदित्यविशेष एव युक्तः। न च तन्त्रभेदः; एकापूर्वार्थत्वे मिथोऽङ्गाङ्गित्वे वा क्रमार्हत्वात्। न च पश्वर्थानुयाजानां प्रधानार्थाग्निमारुतस्य च क्रमापेक्षेति न क्रमार्थाग्निमारुतादूर्ध्वमिति श्रुतिः किन्तु कालार्था। कालस्तु वस्त्वभावेऽपि श...वेलान्यायेनानपेत इति न भेदानुष्ठानम्।

---

* कस्मिँश्चित् पुस्तके '...चरन्तीति' एतत्पर्यन्तमेव सूत्रपाठः। ततः परं भाष्ये पाठः।

सवनीयपुरोडाशदेवतोत्कर्षाधिकरणम् ॥१६॥

उत्कर्षे सूक्तवाकस्य न सोमदेवतानामुत्कर्षः पश्वनङ्गत्वाद् यथा निष्कर्षे नान्वयः ॥११।३।५३॥

पूर्वोक्ते सोमयागे पशूत्कर्षेष्वनुयाजा उत्कृष्यमाणाः सूक्तवाकमप्युत्कर्षेरन्। तत्र च सवनीयदेवतावाचीन्युपपदानि सन्ति। तान्यपि किमुत्कृष्यन्ते न वा? तत्र सवनीयदेवतापदानां पश्वनङ्गत्वात् उत सूक्तवाकोत्कर्षे अनुत्कर्षः असम्बन्धात्।

अनुत्कर्षत्वे च केवलानामपरिपूर्णत्वेन वाक्यार्थबोधनेऽशक्तत्वात्। देवताशेषपदानामप्यावृत्तिर्न तन्त्रतेति **सङ्गतिपूर्वपक्षौ**।

राद्धान्तस्तु—पशुदेवताप्रकाशनार्थे सूक्तवाकशेषपदानां पाठस्तदुत्कर्षे तच्छेषोऽप्युत्कृष्टस्तद्बलाच्च मध्याम्नातसवनीयदेवतापदान्यप्युत्कृष्यन्तां न त्वावृत्तिः कल्प्या।

विवेकस्तु—पशुप्रयुक्त्युपजीवित्वात्सवनीयानां तदेव सवनीस्ते(?) देवतास्मृतिस्तैः कार्येत्युक्तम्। लघ्व्यान्तु प्रस्तरप्रहरणं सूक्तवाकप्रयोजनं सवनीयानां पशुप्रयुक्तमिति सवनीयस्य मेदेन न स्वदेवतापदमात्रप्रयोजनतेति ॥

इति महामहोपाध्यायचन्द्रकृतौ न्यायरत्नाकरे एकादशाध्यायस्य तृतीयः पादः।

अथ चतुर्थः पादः

राजसूये सौमापौष्णादिकेऽङ्गानां मेदेनानुष्ठानाधिकरणम् ॥१॥

चोदनैकत्वाद्राजसूयेऽनुक्तदेशकालानां समवायात्तन्त्रमङ्गानि ॥११।४।१॥

आग्नावैष्णवमेकादशकपालं निर्वपेत्। ऐन्द्रावैष्णवश्चरुः वैष्णवस्त्रिकपालो वामनो दक्षिणा सोमापौष्ण एकादश कपालाः ऐन्द्रापौष्णश्चरुः पौष्णस्त्रिकपालः(श्चरुः?) श्यामो दक्षिणेति श्रुतम्। तत्र पूर्वोत्तरत्रिसंयुक्ते तन्त्रमङ्गानि न वा? अत्र यद्यपि देशकालकर्तॄणां श्रुति ··· मेदस्तथापि कर्तृत्पादकदक्षिणामेदेनार्थात्कर्तृमेदेनार्थात्कर्तृमेदान्नाङ्गतन्त्रतेति कथं **पूर्वपक्षः**।

उच्यते—यद्यपि चरणमरणोत्पाद्यत्वमृत्विजां तथा चरणमेदात्तृतीये तद्मेदोऽप्युक्तस्तथापि चरणोपान्तेषु ऋत्विक्षु कर्ममध्ये दक्षिणा नोपादानमेदमावहति। किन्तु मोहजनकतामात्रेणोपान्तेषु दक्षकरीति **पूर्वपक्षः**।

Scanned with OKEN Scanner

राद्धान्तस्तु—पश्चाद्भाविन्यपि सैवोपादाने कारणं...विनापि धनलाभेनानमन्ते पुमांश इति सर्वजनीनम् ।

नन्वसती सा कथमुत्पादिका ? उच्यते—भावित्वेन तद्धीरे वानतिं जनयति । भावि-विनियोगं प्रति सत्तानादिवेति न दोषः । किमर्थं पुनः सिद्धेषु ऋत्विक्षु तद्दानम्, आवश्यक-दानविधिबलात्तद्दाने ऋत्विक्तातिशयकल्पनात् ।

भाविदक्षिणाधीसत्यतार्थं तद्दानमिति तु चिन्त्यम् । तदिदं **दशमे**(?)वक्ष्यामः ।

उपक्रमे वृतकर्तृनियमाधिकरणम् ॥२॥

अनियमः स्यादिति चेत् ॥११।४।४॥

यद्यपि पूर्वोत्तरत्रिसंयुक्ते चरणमरणोत्पाद्यमृत्विजं भिद्यते तथापि किमृत्विक्त्वाधि-ष्ठानमनियतम् उत भेदे चेति चिन्त्यते ।

ननूपक्रमे वरणैक्यं श्रुतं तत्तन्त्रमिति तद्बलात्तदेवाधिष्ठानमिति कथं **पूर्वपक्षः**। उच्यते—दक्षिणाभेदे कर्तृभेदात्प्रयोगभेदोऽतो वरणमपि भिद्यते । वरणैक्येऽपि दक्षिणाभेदो न स्यात्किन्तु पिण्डिता दक्षिणा स्यात् ।

राद्धान्तस्तु—स्वतः क्रतुविधेः प्रयोगैक्ये कर्तृभेदादभेदः कल्प्यः । तत्रादौ वरणं सकृच्छ्रुतं सकृदस्तु कर्तृत्पादकत्वन्तु तस्य भिद्यतां नाधिष्ठानं देशाद्यन्यतमभेद इव नाधिष्ठान-भेदोऽतः सूक्तं तन्त्रवरणोपक्रमाद्दक्षिणा भिन्ना राजसूये वान्तरप्रयोगाः ॥

अवेष्टावङ्गानां भेदाधिकरणम् ॥३॥

अवेष्टौ चैकतन्त्र्यं स्याल्लिङ्गदर्शनात् वचनात् कामसंयोगेन ॥११।४।८॥

राजसूये अवेष्टिराम्नातः । आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणा बार्हस्पत्यश्चरुः शितिपृष्ठो दक्षिणा । सा च राजसूयेनेति वाक्येन स्वाराज्यकामार्थेति । राजसूयेऽन्तस्था वाक्यान्तरेणान्नाद्य-काम्यार्थेति बहिःस्था च । तत्र ब्राह्मणादियुक्तं मध्ये निधानवचनं बहिरवेष्टौ राजसूये क्षत्रिय-मात्राधिकारात्तदा च मध्ये श्रुतेर्बहिरवेष्टौ प्रयोगैक्यमिति स्थिते अन्तरवेष्टौ पर्वद्वये चिन्ता—किमत्राप्येकः प्रयोगो न वा ?

ननु दक्षिणाभेदात्प्रयोगभेद एव युक्तः इति कथं **पूर्वपक्षः**। उच्यते—दक्षिणावयवे दक्षिणापदं पिण्डितैका दक्षिणा अन्यथा बहिरवेष्टावपि प्रयोगैक्यं न स्यात् । अन्नाद्येऽपि सदक्षिणस्य यागद्वयस्य उत्पन्नस्य यथोत्पत्तिविधानात् ।

Scanned with OKEN Scanner

राद्धान्तस्तु—न प्रयोज्यकर्माङ्गं दक्षिणा येनोभयत्राधिकारे उत्पन्नसदक्षिणमेव कर्मान्वयात्किन्तु प्रयोगाङ्गमधिकारभेदे च प्रयोगभेदादेकत्रैव प्रयोगेऽन्तरेव दक्षिणामुख्यत्वात्। न बहिः, मध्यनिधानवचनविरोधादिति दक्षिणाभेदादेवेष्टिप्रयोगो भिन्न इति न तन्त्रमङ्गानि। बहिरेवेष्टौ तु प्राकृत्ये कैव दक्षिणा।

पवमानेष्टिहविषां भेदेनानुष्ठानाधिकरणम् ॥४॥

पवमानहविःष्वैकतन्त्र्यं प्रयोगवचनैकत्वात् ॥११।४।१०॥

आधाने पवमानेष्टयः श्रुताः अग्नये पवमानायाष्टाकपालं निर्वपेत् अग्नये पावकायाग्नये शुचये। तत्र किमासामेकतन्त्र्यं न वा? तत्र देशाद्यभेदात्प्रयोगभेद इति **पूर्वपक्षः**। तदभेदेऽपि (प्रयोग?) वचनाद्भेद इति **राद्धान्तः**। तथा हि यः कामयेत वर्षीयान् श्रेयान् स्यामिति तस्याग्नये पवमानाय निरूप्याथ पावकायाथ शुचये चोत्तरे हविषी समानबर्हिषी निर्वपेदिति वचनेन प्रयोगभेदो विधीयते। वर्षीयानत्यन्तं वसुमानित्यर्थः।

असत्यप्यस्मिन्वचने हविस्त्रयस्य समानबर्हिष्ट्वे सिद्धे उत्तरहविर्द्वयस्य समानबर्हिष्ट्वं सिद्धं समानकर्तृताक्रमश्च सिद्धः।

अतो विधेयान्तराभावात् प्रयोगभेदविधिः साङ्गं पूर्वं समाप्योत्तरे कुर्यात्। एवञ्चोत्तरयोरेकतन्त्र्यं भेदे मानाभावादितरेतरयोगाच्च।

नन्वेवं क्त्वाश्रुतितः प्रतिपन्नं समानकर्तृत्वं विरुद्ध्यते, मैवम्। यदाऽगत्या प्रयोगविधिभेदविध्यर्थमिदं वाक्यमिति स्थितं तदा सहाप्रयोगापेक्षं समानकर्तृत्वमनूद्यमिति न विरोधः।

विवेकस्तु—इह गुणफलवाक्ये क्तः सिद्धावस्तु धात्वर्थधीः नाख्यादिव साध्यावस्थे सिद्धता चानुष्ठानसिद्धेरिति पूर्वं हविःप्रयोगभेदधीः। ...... रूप्याणीति सहत्वावगतेरस्तु त्रयाणामेकप्रयोगत्वम्। मैवम्, कालविधिपारसहत्वं यथाप्राप्तमनूद्यमविवक्षितं यो ब्रह्मवर्चसकामः स्याचस्य सर्वाणि हवींषि निरूप्याणीति गुणफलान्तरे सहत्वप्राप्तेरिति।

द्वादशदिनसाध्यत्वाधिकरणम् ॥५॥

द्वादशाहे तु प्रकृतित्वादेकैकमहरपकृष्येत कर्मपृथक्त्वात् ॥११।४।१४॥

द्वादशाहेन प्रजाकामं याजयेदिति तत्र पृथक्कालीना दीक्षा उपसदश्च चोदकप्राप्ताः। तत्र किं पृथक् पृथक् दीक्षोपसादनेहैकाहसाध्यं कर्म ततश्च द्वादश पञ्चविंश तिरात्राः उत द्वादशाद्य ... (साद्यस्काः?) कर्तव्याः अथवा चतुरहे दीक्षाश्चतुरहे उपसदः चतुरहे सुत्याः अथवा स्वस्थाम्नानां दीक्षोपसत्सुत्यानां विवृद्धिः। तत्राद्यः पक्षः त्रिवृदादिस्तोत्रमुखोत्पन्नेषु द्वादशाहमिति कर्मसु प्रत्येकं

Scanned with OKEN Scanner

दीक्षा उपसत्तातिदेशतः प्राप्ता। सा च प्रकृतौ प्रधानकालाद्भिन्ना। तदा चेह द्वादश दीक्षा द्वादशोपसद इति वचने द्वादशत्वं भिन्नकर्मसम्बन्धिनीषु विहितम्। अतो यद्यपि प्रकृतौ द्वादश दीक्षाः कल्पाम्नानादिहापि चोदकादेव द्वादश दीक्षा लभ्यन्ते तथापि द्वादश दीक्षा इत्यत्र वाक्येऽसति एका दीक्षेत्यादिकल्प एव स्यात्।

विकृतौ कल्पान्तराणामनुत्कर्षस्योक्तत्वात् षष्ठे एकैकस्मिन् कर्मणि द्वादश दीक्षा उपसदः एका च दीक्षा एकस्मिन्नहनीति प्रकृतौ द्वादश दीक्षाः द्वादशस्वहःस्वप्रवृत्ताः। अतोऽत्रापि द्वादश दिनेषु द्वादश दीक्षाः। तथा द्वादशोपसदः प्रधानमेकस्मिन्दिन इत्येकः पञ्चविंशति रात्राः। एवं द्वादश पञ्चविंशतिरात्राः।

अस्मिंश्च पक्षे द्वादशाहकालत्वं सुत्याकालापेक्षया द्वितीयस्तु भिन्ने(य?)ऽप्यत्र प्रधानेषु अभिन्नकालादीक्षा उपसदश्च द्वादश तदहरेव युक्ताः; अतो न द्वादश पञ्चविंशति-रात्राः युज्यन्ते।

ननु प्रकृतौ दीक्षोपसदोर्नानेकाहमितिकर्मार्थता दृष्टा। अतो द्वादशाहेऽपि सकृदनुष्ठितस्य तस्य नानेकाहमितः कर्मार्थतेति द्वादश पञ्चविंशति रात्रा इति युक्तम्। मैवम्।

प्रकृतौ यत्सदीक्षोपसदमेकमहरपवर्जितं तदाद्यमेकत्वात्प्रधानस्य। अत्र तु प्रधानायुक्त-त्वात् सर्वार्थे सकृद्दीक्षा द्वादशत्वं घटेत एवेति न द्वादश पञ्चविंशतिरात्राः। किन्तु द्वादश सा··तथा हि यदि द्वादशाहपदं नाम न गुणविधिः तथापि प्रकृतिनिमित्तार्थे द्वादशाहसाध्ये तानि कर्माणि वक्तव्यानि।

अतः साङ्गं प्रधानं द्वादशाहसाध्यं तदा चैकैकाहसाध्यकर्मभेदे साङ्गमेकैकाहमितं कर्मे-त्यहर्भेदेनैव दीक्षोपसदनुष्ठानम्। अत एकस्मिन्नहनि दीक्षोपसत्सुत्याः सत्यं क्रियन्ते। एवं दिनान्तरेऽपीति द्वादशत्वं घटते। अन्यथा बहुतराहसाध्यत्वं स्यादिति न द्वादशाहसाध्यत्वमुरसः। अतो द्वादशाहशब्दबलात् प्राकृतीं पृथक्कालतां दीक्षाया हित्वा प्रधानकाल एव सदीक्षोपसदः प्रधानमिति न दीक्षातन्त्रम्।

तृतीयस्तु पृथक्कालत्वं द्वादशाहत्वार्थबोधाय समं स्यादिति न्यायादुत्तराहे द्वादश दीक्षा एकैकस्मिन्नहनि तिस्रो दीक्षाः कार्याः।

एवञ्चतुरहे उपसदश्चतुरहे सुत्या इत्यतः समुदाये द्वादशत्वोपपत्तेः। कर्त्राद्यभेदेन च प्रयोगवचनैक्यान्न तन्त्रम्। दीक्षा भिन्नकाला हि सा तन्त्रं भवितुमर्हति।

एवं द्वितीये तृतीये पक्षे द्वादशाहत्वं साङ्गसुत्या कालापेक्षया।

राद्धान्तस्तु—प्रकृतौ स्वकालत्वमेव यत्प्रतिपन्नं तदबाधाय स्वस्थानविवृद्धिर्दीक्षोपसत्सुत्यानां युक्ता। अतो द्वादशदिनेषु द्वादश दीक्षाः। द्वादशदिनान्तरेषु द्वादश उपसदः। ततो द्वादशदिनान्तरेषु सुत्याः। एवञ्चात्र दीक्षोपसत् सुत्यानां द्वादशत्वे प्रत्येकं द्वादशाहबुद्धेः प्रत्येकं स्वरसतः प्रतीतं द्वादशाहकालत्वं न हातुं युक्तम् ॥

प्रधानैरपृथक्कालानामङ्गानां भेदेनानुष्ठानाधिकरणम् ॥६॥

भेदस्तु तद्भेदात्कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात्
॥११।४।२२॥

द्वादशाहे येषां भिन्नः कालो न श्रुतः तान्यङ्गानि तन्त्रं न वा तन्त्रं तानीति **पूर्वपक्षः**।

ननु प्रधानकालभेदात्तत्कालवर्तिनामङ्गानाम्भेद एवोचितः। मैवम्, द्वादशाहशब्दो न कालविधायकः। अतः कर्मभेदमात्रमत्रेति कालभेदाभावे प्रयोगविध्याक्षिप्तसहत्ववशात्तन्त्रतैव।

राद्धान्तस्तु—अतिरात्रादिशब्दाः स्तोत्रवाचिनस्तोत्रं विवदति(?) ग्रहहोमोत्तरकालतया च तेषां ग्रहहोमाक्षेपः। ग्रहयज्ञौ तु प्रत्येकं सौमिकधर्माः इति प्रत्येकं सवनत्रयसाध्यता। तदा चाद्यं श्वःकालभेदोऽवश्यमिति प्रधानकालभेदेन तन्त्रमङ्गानीति। उत्पत्तावप्ययं कालभेदः प्राकृतकालकार्यः इति प्रयोगाङ्गम्। अतः प्रयोगाङ्गकालभेदान्न तन्त्रतेति।

द्वादशाहे उपसत्कालीनसुब्रह्मण्याह्वाने विवृद्धसुत्याह्वानुपलक्षणाधिकरणम् ॥७॥

सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत्
॥११।४।२६॥

पृथक्कालत्वे तत्कालं चतुरहे सुत्यामागच्छ मघवन्निति सुब्रह्मण्याह्वानम्। तच्च द्वादशाहे अतिदिष्टम्। तत्किमधिकारेण प्रयोक्तव्यम् उत यथायथमविकारेण। चतुरहे शब्द आवर्तेत इति चिन्ता सङ्गती **पूर्वपक्षः**। चतुरहपदं विवक्षितार्थमविवक्षायां प्रमाणाभावात्। तत्रानावृत्तं सत्कृत्मे प्रकाशनसमर्थमित्यावृत्तश्चतुरहे चतुरह इत्येवं चतुरहेष्विति वचनोहः द्वादशाह इति सामान्यनिर्देशो न युक्तः, प्रकृतौ वचननाम्नोर्विवक्षितत्वात्।

राद्धान्तस्तु—सौत्यदेवतास्मृतिपरोऽयं मन्त्र। न हि मघवा सुत्यामागच्छति। अतो विषमलक्षणवदविवक्षितश्चतुरहपदमुपलक्षणमात्रम्। सुत्यान्वयमात्रं हि प्रकृतौ देवतायाः स्मार्यमितीहापि तन्त्रता। लघ्व्यामागच्छेत्येवं परोऽयं मन्त्रः इति यदुक्तं तदप्यन्वयाभिप्रायमिति।

कुम्भ्यादीनां तन्त्रताधिकरणम् ॥८॥

पशुगणे कुम्भीशूलवपाश्रपणीनां प्रभुत्वात्तन्त्रभावः स्यात्
॥११।४।२९॥

एकदैवत्ये प्राजापत्यपशुगणे किं कुम्भ्यादितन्त्रं न वा? तत्रैकैव कुम्भी सर्वपशूनामवदानानां पाके श्रुतं हृदयादीनां वपाश्रपण्यौ वपानां प्रभवत इति। तत्र त्रैप्रयादिवत्सिद्धावुत्तरविवक्षार्थं युक्ताः। न ह्येकं कुम्भ्यादिपाके क्रमादनेकम्वा सहेति सहत्वदेशनात्प्रयुक्तिगौरवाच्चेति।

भिन्नदेवताकेष्वपि कुम्भ्यादीनां तन्त्रताधिकरणम् ॥९॥

भेदस्तु सन्देहाद्देवतान्तरे स्यात् ॥११।४।३१॥

अनेकदैवत्ये तर्हि मोहापत्तेः पात्रभेदोऽस्त्विति **पूर्वपक्षः**। चिह्नेनापि सहत्वसम्भवान्न तद्बाध इति **राद्धान्तः**।

वसाकुम्भ्यापि तन्त्रताधिकरणम्* ॥१०॥

अयाज्यत्वाद्वसानां भेदः स्यात्स्वयाज्याप्रदानत्वात् ॥११।४।३३॥

वसानां संसर्गिद्रव्यत्वाच्चिह्नमप्यशक्यं स्वयाज्यार्द्धर्चान्ते वसाहोम इत्युक्तम्। अतो वसाविवेकाय पात्रभेद इति **पूर्वपक्षः**। सूत्रेऽयाज्यत्वादमिश्रणीयत्वादित्यर्थः।

राद्धान्तस्तु—अवदानपाके अर्थनिष्पादिनी वसाऽतो वसाप्रतिपत्तिर्वसाहोमो वसामपि न प्रयुंक्ते। दूरे पात्रं तथा संसर्गिणी वसा सर्वपशूनां तेन तस्याः सर्वयाज्यार्द्धर्चान्ते प्रतिपत्तिर्भवति। एवं परयाज्यार्द्धर्चान्तेऽपि स्यादिति चेत् अस्तु न निषेधश्रुतिः—

नन्वेवं तर्हि सकृदेव वसायां कृतायां कृतः शास्त्रार्थ इति याज्यार्द्धर्चान्तावृत्तावपि न होमः स्यात्। मैवम्, निमित्तभूतयाज्यार्द्धर्चान्तभेदात्प्रतिपाद्यस्य च भावाद्धियते होमः लभ्यम्। अनिषिद्धेऽप्यश्रुते परयाज्यार्द्धर्चान्ते दोषाशङ्का। उपादेये दोषो न प्रतिपाद्यते। तद्धि यथोपात्तं शास्त्रार्थः।

भिन्नजातिषु कुम्भ्यादीनां भेदेनानुष्ठानाधिकरणम् ॥११॥

जात्यन्तरेषु भेदः स्यात् पक्तिवैषम्यात् ॥११।४।३७॥

भिन्नजातीयपशुषु एकदेवताकेष्वनेकदेवताकेषु वा आजाविकमांसपक्तिवैषम्यात् पात्रभेद इति पूर्वप्रनुदहवणम्।

न च पक्तमुद्धृत्य शेषे पाकः पक्तिगत्वादेः पाकज्ञानपाकापकसन्देहे दुःशकं बहुव्यावापेक्षं चेति वरं पात्रभेद इति।

---

*अन्येन पृथग्रूपेण नाधिकरणमेतत् स्वीकृतं न वा 'अयाज्यत्वादि' सूत्रमेव अधिकरणसूत्ररूपेणाङ्गीकृतम्।

Scanned with OKEN Scanner

प्रतिपुरोडाशं कपालभेदाधिकरणम् ॥१२॥

कपालानि च कुम्भीवत्तुल्यसंख्यानाम् ॥११।४।३९॥

यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणाँश्चतुष्कपालान्निर्वपेदिति बहुपुरोडाशश्रपणं किञ्चतुर्षु कपालेषु उत प्रतिपुरोडाशं कपालचतुष्कभेदः ? **पूर्वपक्षः**-कुम्भीवद्दीर्घकपालचतुष्कं तन्त्रम्। अवयवद्वारा चावयविन एव तत्र व्यापारोऽध्वर्योधिकरणव्यापृतस्य।

राद्धान्तस्तु—न प्रकृतौ कपालान्यवयवद्वारा व्यापृतानि किन्तु स्वत इति विकृतावपि तथाद्वये कपालान्तरम्। अत्र च यावत्कपालं प्रथयतीति वाक्य··मुपेक्ष्य न्यायव्युत्पत्तिः सुहृद्गु··। वाक्यमुद्घाटितं कपालसमः पुरोडाशः कर्म न महत्त्वेऽपीति।

[अत्र प्राण्डुलिप्यां काचित् त्रुटिर्विद्यते। 'राद्धान्त' शब्दात् पूर्वं 'विवशे' इत्येव वर्त्तते। प्रायः टीकेयं अधिकरणान्तरस्य। तत्रापि पाठः प्रमादपूर्णो दृश्यत इति।]

राद्धान्तस्तु—एकस्यावयवव्यापारे कश्चिदवयवः क्वचित्साक्षात्साधनं क्वचिदवयवान्तरद्वारेति द्विकता स्यादिति। हन्तौ करणमन्त्रः किम्प्रतिप्रहारं वत्सकृत्पूर्वपक्षः प्रहारमन्त्रं हन्ति वाच्यं न भ्यासः(?) तस्याक्षेपात् यथाभिधानं विनियोगान्नियोगमवनताभेदेनेति प्रतिप्रहार-मनुष्ठेयप्रकाशकमन्त्रो भेदेनेति।

राद्धान्तस्तु—वैतुष्यरूपेषु फलसाधनतया विनियोगोऽभ्यासाक्षेपगर्भः इति तावता साधनत्वान्न तन्त्रावृत्तिः।

नानाव्रीजेष्टौ प्रतिप्रहारं मन्त्रावृत्त्यधिकरम् ॥१४॥

द्रव्यान्तरे कृतार्थत्वात्तस्य पुनः प्रयोगान्मन्त्रस्य च तद्गुणत्वात्पुनः प्रयोगः स्यात् तदर्थेन विधानात् ॥११।४।४३॥

नानाव्रीजेष्टौ संस्कार्यव्रीजभेदान्मन्त्रावृत्तिः।

ननु हन्तिपदार्थानुसमयस्योक्तत्वात् सर्वत्रासमाप्ते स्मृतिरेकैवास्तीति नावृत्तिः। मैवम्, अवान्तरापूर्वसंस्कार्यसाध्यसाधनताभेदान्न साधनताप्रकाशनं तन्त्रम्।

प्रतिनिर्वापादिमन्त्रावृत्त्याधिकरणम् ॥१५॥

निर्वपणलवनस्तरणाज्यग्रहणेषु चैकद्रव्यवत्प्रयोजनैकत्वात् ॥११।४।४४॥

किं निर्वापमन्त्रस्तन्त्रमुत प्रतिमुष्टिभेदेनेति **पूर्वपक्षः**। पुरोडाशशक्तुव्रीहिव्रीजपृथक्करणं निर्वापकार्यमेकमतो निर्वापोऽप्येकः। अत एव न पञ्चमे चतुर्मुष्टिनिर्वपणसमय उक्तः। अतो मन्त्रस्तन्त्रम्।

राद्धान्तस्तु—यद्यपि निर्वापस्य प्रधानं कार्यमेकं तथापि तत्र मुष्टिद्वारा सम्बन्धः मुष्टिपृथक्करणता च निर्वापमुष्टिभेदादावर्तत इति मन्त्रावृत्तिः। विधेयतया तु पदार्थस्याभेद उक्तः। पञ्चमे प्रत्येकं तु व्रीहिव्यक्त्यनवच्छेदान्न प्रतिप्रहारं मन्त्रावृत्तिः। अतः शास्त्रार्थतयैक्येऽपि नियतकर्मविशेषसंस्कारनिरूपिता······भेदात्स्मारकमन्त्रावृत्तिः। याज्ञिकान्तु(स्तु?) सकृन्मन्त्र-प्रयोगो मोहात्।

वेदिप्रोक्षणाङ्गमन्त्रस्य सकृत्प्रयोगाधिकरणम् ॥१६॥

वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् ॥११।४।४७॥

तर्हि त्रिः प्रोक्षतीति वेद्याः प्रतिप्रोक्षणं मन्त्र इति **पूर्वपक्षः**। वेद्याः कर्मभूतायाः अभेदान्मन्त्रभेदतेति **राद्धान्तः**। **विवरणे** प्रोक्षणगुणो मन्त्रो वा(?)ऽग्नेति नावृत्त्यर्थो मन्त्रः। प्रोक्षणभेदे हि मन्त्राच्च भिन्नप्रोक्षणावृत्तौ एवमेकद्रव्यहन्तावपि न मन्त्रावृत्तिः।

कण्डूयनमन्त्रस्य सकृत्प्रयोगाधिकरणम् ॥१७॥

कण्डूयने प्रत्यङ्गं कर्मभेदात् स्यात् ॥११।४।४८॥

यदैकदानेकत्राङ्गे कण्डूयनं तदा कृष्णविषाणया कण्डूयने तन्मन्त्रस्तन्त्रं न वेति **पूर्वपक्षः**। भूतविकारोऽस्यङ्गगामी कण्डूयत्यपनेय इत्यङ्गसंस्कारिकाक···रङ्गभेदे तन्मन्त्रावृत्तिः बीजभेद इव मन्त्रस्य।

राद्धान्तस्तु—नाङ्गस्यायं संस्कारः किन्तु कर्तुः। तत्राश्रितासावेका वेदना आत्मनस्तदप-नोदार्थक···तिः। अन्यथा व्याक्षिप्तचित्तो न कर्म कर्तुं शक्तः स्यादिति तन्मन्त्रस्तन्त्रम्।

स्वप्नादिमन्त्रानावृत्त्यधिकरणम् ॥१८॥

स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम् ॥११।४।५१॥

सोमे स्वप्नादिमन्त्रे चिन्ता किं प्रतिस्वप्नं मन्त्रस्तन्त्रं न वा? विच्छेदस्य कादाचित्कत्वात्सा···रतया निद्राभेदः तन्त्रावृत्तिरिति **पूर्वपक्षः**।

राद्धान्तस्तु—शक्तितेऽप्यन्तरा प्रबोधे कृत्स्ने रात्रिनिद्रामुद्दिश्य वेष्टित इति... "-क्यान्मन्त्रस्तन्त्रम्। एवं कृत्स्ने नदीतरणमुद्देशोऽतो द्वीपभेदेन स्तोत्रभेदेऽपि तरणमन्त्रस्तन्त्रम्। प्रवर्षणेऽप्यन्तराविच्छेदस्य कादाचित्कत्वादविच्छिन्नवर्षणोद्देशेन मन्त्रस्तन्त्रम् स्वप्नमन्त्रवत्तया नानादेशस्थाने कामेध्यदर्शने चाक्षुषमेकं ज्ञानमेकदा कालभेदेऽपि व्यलीकं कालाभेदादिति तन्मन्त्रस्तन्त्रमिति॥

दीक्षितस्य प्रयाणे मन्त्रानावृत्त्यधिकरणम् ॥१९॥

Scanned with OKEN Scanner

प्रयाणे त्वार्थनिर्वृत्तेः ॥११।४।५२॥

दीक्षितस्य बलीवलनार्थं प्रस्थितस्य विश्राममेदात्प्रयाणभेदे मन्त्रस्तन्त्रं न वा ? स्वप्रादावनियतो विच्छेदः । प्रयाणे तु नियत इति तद्भेदान्मन्त्रावृत्तिरिति **पूर्वपक्षः** । एकवलीवलनामेकैककार्यपर्यन्तमेकम्प्रयाणमिति तन्मन्त्रस्तन्त्रं यात्रामङ्गलवदिति **राद्धान्तः** ।

उपरवखननमन्त्रस्यावृत्त्यधिकरणम् ॥२०॥

उपरवमन्त्रस्तन्त्रं स्याल्लोकवद्बहुवचनात् ॥११।४।५३॥

यद्युपरवभेदान्मन्त्रावृत्तिर्युक्ता तथापि वैष्णवान्खनामीतिमन्त्रे बहुवचनात् तन्त्रतेति **पूर्वपक्षः** । प्रत्येकं मन्त्रप्रयोगे बहुवचनं न स्यात् ।

राद्धान्तस्तु—खननमनुष्ठेयं मन्त्रप्रधानं कार्यम् । तच्च क्रमतो विभिन्नमतस्तद्भेदान्मन्त्रावृत्तौ बहुत्वमविवक्षितम् ।

न च पाशानयगतार्थता, तत्र मन्त्रोत्कर्षापत्तेरविवक्षितोक्ता अत्र तु कार्यबलात् । तदेवं यस्योपरवस्य खननमन्त्रः सन्निपतति तस्यैव मन्त्रकारितः संस्कारो न सर्वेषामतो मन्त्रावृत्तिः । ये त्वसन्निपातिकर्मणां मन्त्राः यथा सुब्रह्मण्याह्वाने देवा ब्रह्माण इत्यौपवसथ्येऽहनि, तेषामेककालत्वादगृह्यमाणविशेषत्वात्तत्तन्त्रम् ।

हविष्कृदादिमन्त्राणामावृत्त्यधिकरणम् ॥२१॥

हविष्कृदध्रिगुपुरोनुवाक्यामनोतस्यावृत्तिः कालभेदात् स्यात् ॥११।१।५५॥

हविष्कृदाह्वाने अध्रिगुप्तैषः'''पुरोनुवाक्यामनोतामन्त्रस्य त्वावृत्तिः कालभेदादिति पूर्वप्रत्युदाहरणम् ।

अथवाधिकरणान्तरम् ।

सोमे प्रतिसवनं सवनीयाः पुराडाशास्तेषु हविष्कृदाह्वानं सहत्वार्थग्रहाय तन्त्रमिति प्राप्ते—

उच्यते—आवृत्तिः कालभेदाद्गृह्यतेऽत्र विशेषः । प्रातः सवनीयानां पुरोडाशानां हविष्कृदाह्वानं प्रातःकालं न सवनीयान्तराणाम् । तथा वाजपेये ऋतुपशवः प्राजापत्याश्च तत्राध्रिगुप्तैषः ऋतुपशूनां तथा कृष्णग्रीवयोः सौम्येन व्यवायात्पूर्वस्य कृष्णग्रीवस्य पुरोनुवाक्यामनोता वेति शेषं भाष्यादावनुसन्धेयमिति ॥

चतुर्थः पादः समाप्तः ।

इति प्रभाकरैकदेशीयमहामहोपाध्यायश्रीचन्द्रकृतौ न्यायरत्नाकरे एकादशोऽध्यायः सम्पूर्णः ।

Scanned with OKEN Scanner